प्रबन्धसौधः

(संस्कृतस्य आदर्शनिबन्धाः)

एस्. जगन्नाथः

सुरभारतीप्रकाशनम्
बेङ्गलूरु - ५६० ०८५

प्रबन्धसौधः

पञ्चाशत् (५०) आदर्शप्रबन्धाः

एस्. जगन्नाथः

प्रकाशकम्

सुरभारतीप्रकाशनम्

११५/१७, कत्तरिगुप्पे, बनशंकरी तृतीय घट्टः

बेंगलूरु - ५६० ०८५.

Prabandha-saudhaḥ : Fifty essays in Saṁskṛta by S. Jagannatha for the benefit of the interested public who want to practice writing Saṁskṛta-essays and published by Dr. B.S. Ramakrishna Rao for Surabhāratī Prakāśanam, Bangalore-85.

Pages : 96 (Crown 1/8)

First Edition : 1999 (Saṁskṛta year)

© : **The author**

All rights reserved by the author. No part of this work may be reproduced in any form or by any means without the written permission of the author.

Price : Thirty Rupees only.

Copies can be had of :

1. **Surabhāratī Prakāśanam**
   115/17, Poornaprajna Layout,
   Kattariguppe, BSK III Stage,
   Bangalore - 560085. Phone : 6791267

2. **Vedanta Book House**
   92, 6th Main Road,
   Chamarajapet, Bangalore-560 018
   Phone : 080-6507590

Printed and Typeset by :
Vāgartha
8th Cross, N.R. Colony, Bangalore-19. Phone : 6527677

अनुक्रमणिका

	द्वित्रा वाचः	v
१.	भाषा	1
२.	पुस्तकम्	2
३.	पठनम्	2
४.	ग्रन्थालयः	3
५.	वनम्	5
६.	दरिद्रता	6
७.	सज्जनाः	7
८.	मम उत्तमं मित्रम्	8
९.	सत्यस्य महिमा	9
१०.	समुदाचारः	9
११.	अतिथीनां धर्मः	10
१२.	पक्षिणः	11
१३.	मम शाला	12
१४.	उन्नतः शिक्षकः	14
१५.	शालायाः वार्षिकोत्सवः	15
१६.	मम गृहम्	18
१७.	मम देशः	19
१८.	जननी जन्मभूमिश्च स्वर्गादपि गरीयसी	20
१९.	कृषीवलः	21
२०.	कुम्भकारस्य आत्मवृत्तम्	23
२१.	विपणिः	24
२२.	आदर्शः नागरकः	25
२३.	भिक्षुकः	26

२४. जीवने हास्यस्य पात्रम् 28
२५. प्रयत्नः 29
२६. रत्नप्रायं वचनम् अथवा सुभाषितम् 30
२७. समयः सु-मयः कर्तव्यः 32
२८. विराभ्यासः 33
२९. चित्रकला 36
३०. क्रीडाः 36
३१. आरोग्यभाग्यम् 37
३२. जनसङ्ख्यावृद्धिः कुटुम्बकल्याणं च 40
३३. वरदक्षिणा (यौतुकम्) 43
३४. परिसरमालिन्यम् 46
३५. सङ्गणकयन्त्रम् 48
३६. समूहमाध्यमानि (सामान्यतः) 51
३७. दूरदर्शनम् 54
३८. आधुनिकसमाजस्योपरि चलच्चित्रस्य प्रभावः 55
३९. कृतकः उपग्रहः 58
४०. भारतीया संस्कृतिः 60
४१. सामाजिकाः कण्टकाः 62
४२. भ्रष्टाचारः 65
४३. देशस्य अखण्डता, तस्याः विघ्नाश्च 67
४४. साहितीकारः 69
४५. प्रबन्धः तस्य रचना च 71
४६. जानपदम् 74
४७. भाषणकला 78
४८. नाटकम् 80
४९. नाटकनिर्देशकः 83
५०. भगवान् पाणिनिः 85

द्वित्रा वाचः

एषः प्रबन्धसौधः पूर्वं प्रबन्धपल्लवनाम्ना द्विवारं प्रकटितस्य ग्रन्थस्य जन्मान्तरम् ।

पूर्वं प्रकाशितात् प्रबन्धपल्लवादस्य ग्रन्थस्य भूयस्सु भागेषु महद् वैलक्षण्यमस्ति । विषयानुगुण्येन प्रबन्धक्रमाङ्केषु परिवर्तनं, भाषापरिष्कारः, बहूनां नूतनांशानां संयोजनश्चात्र प्रधानम् । अपि च ४, ११, १५, १८, ३०, ३७, ४०, ४८ एतत्सङ्ख्याङ्किताः अष्टौ प्रबन्धाः सर्वथा नवीनाः । एते प्रबन्धपल्लवे नैवासन् ।

प्रबन्धपल्लवगतः पत्रविषयको भागोऽत्र त्यक्तः । तत्र कारणं तु - 'पत्रसौध'स्य पार्थक्येन प्रकाशनम् । पत्रलेखनाभ्यासं कर्तुकामैः पत्रसौध एव द्रष्टव्यः ।

ममानवधानात् पतितानां केषाञ्चन भाषादोषाणां परिशुद्धिं कृतवते विद्वन्मित्रस्य डा ॥ बि.एस्. रामकृष्णरावस्य विषयेऽहमत्यन्तमेव कृतज्ञोऽस्मि ।

अपि च यथावत् कृत बन्धुर-मुद्रणाय वागर्थ स्वामिने एम्. एन्. प्रसादाय, राघवेन्द्राय, फणि च धन्यवादान् समर्पयामि ।

एस्. जगन्नाथः

२९२५, ग्रन्थाश्रमः

सरस्वतीपुरम्, प्रथमो घण्टापथः,

पञ्चम उपपथः, मैसूरु - ५७० ००९.

दूरवाणी - ०८२१-५४१६८७

१. भाषा

व्यवहारस्य मुख्यं साधनं भाषा । भाषां विना कोऽपि स्वस्य अभिप्रायं परेभ्यः ज्ञापयितुं न शक्नोति । भाषायाः अनुग्रहेण एव जगत् सर्वं प्रकाश्यते । भाषारहितं जगत् केवलम्[१] अन्धकारः एव।

भाषागतानां सर्वेषाम् अंशानां समग्ररूपेण अध्ययनार्थम् एव काचित् विज्ञानशाखा उत्पन्नाऽस्ति । तस्य नाम, भाषाविज्ञानम् । एतद् विज्ञानम् अधीत्य संशोधनं कुर्वाणाः ''भाषाविज्ञानिनः'' अभिधीयन्ते। एतेषां संशोधनैः (=अनुसन्धानैः) भाषाविचारे अत्यन्तं रोचकाः विषयाः अवगताः । भारते सहस्राधिकं भाषाः सन्ति किल । कासाञ्चन भाषाणां लिपिः नास्ति ।

अध्ययनं विनाऽपि स्व-मातृभाषायां सर्वेऽपि ज्ञानिनो वर्तन्त एव इति काचित् कल्पना अस्ति । वस्तुतस्तु, अध्ययनेन एव यस्याः कस्याः अपि भाषायाः स्वरूपं समीचीनतया ज्ञायते ।

भाषायाः मुख्यम् उद्देश्यं मानवानां परस्परेण सम्पर्कः । हृद्गतानां भावानां, परम्परानुगतानां चिन्तनानाम्, आशानां, धार्मिकविश्वासानां च एकस्याः व्यक्तेः - अपरां व्यक्तिं प्रति प्रेषयितुं यया भाषया कर्तुं शक्यते सा भाषा प्रशस्ता । विश्वस्मिन् सर्वाभिः भाषाभिः एतत् सर्वं कर्तुं शक्यते; तस्मात् **सर्वा अपि भाषाः प्रशस्ताः ।**

---

१. पदान्ते विद्यमानस्य मकारस्य स्वरे परे मकारः पूर्ववत् शिष्यते । (तस्मिन् स्थलेऽनुस्वारादेशो न भवति)

२. पुस्तकम्

ज्ञानविज्ञानमनोरञ्जनादीनां लिपिरूपस्य साधनस्य द्वारा बोधयित्री सामग्री एव पुस्तकमिति व्यवह्रियते ।

याः व्यक्तयः यत् पुस्तकं पठन्ति इति अंशस्य आधारेण ताः व्यक्तयः कीदृशेन स्वभावेन युक्ताः इति वक्तुं शक्यते ।

पुस्तकरचनारूपं संशोधनं प्राचीनैः अस्मभ्यं दत्तम् अमूल्यं योगदानम् । पुस्तकानि यदि न अभविष्यन् विज्ञानस्य विकासः, विचारप्रगतिः, शिक्षणक्रान्तिः एतेषु एकतममपि न अभविष्यत् ।

मनुष्येण साधितानाम् आश्चर्यकरीणां सिद्धीनां मध्ये पुस्तक-लेखनम् एव महत्तमा सिद्धिः । अस्माकं विचाराः पुस्तकेषु आकारं प्राप्नुवन्ति । अस्माकं ज्ञानं पुस्तकेषु सुरक्षितं तिष्ठति । अस्माकं परम्परा पुस्तकेषु प्रतिबिम्बिता भवति । किं बहुना, मनुष्याकृतेः लिपिस्वरूपेण वर्तमानः आकारः एव पुस्तकम् ।

३. पठनम्

पठ् धातोः अर्थाः त्रयः - १. अन्येन विरचितस्य वाङ्मयस्य लिपिरूपेण पुस्तके बिम्बितस्य उच्चारणद्वारा ध्वनिरूपता-सम्पादनम्। २. तादृशस्यैव वाङ्मयस्य-उच्चारणं विनैतदुपरि नेत्रस्थापनपूर्वकं-मनसा ग्रहणम् । ३. स्फूर्त्या झटिति मुखद्वारा साहित्यरचना । तृतीयोऽर्थः संस्कृतस्य प्राचीनेषु केषुचन ग्रन्थेषु अतीवविरलतया लभ्यते[१] । अत्र प्राथमिकम् अर्थद्वयं गृहीतम् ।

१. उदाहरणार्थं बल्लालसेनविरचिते भोजप्रबन्धे ।

ये सम्यक् पठितुं जानन्ति ते पुस्तकस्य हृदयमपि जानन्ति । प्रथमतः विद्यार्थिनः मुखेन पठेयुः । पठनसामर्थ्ये वृद्धिं गते ओष्ठचलनं विना मौनेन पठनं सिध्यति ।

पठनकौशलम् अभ्यासेन वर्धते । शीघ्रं पठितुम् अभ्यासः करणीयः ।

केवलं पाठ्यपुस्तकानि पठनीयानि इति केचिद् विद्यार्थिनः भावयन्ति । वस्तुतस्तु पठनीयानि वाङ्मयानि सहस्रशः सन्ति, येन पठने चिन्तनशक्तौ अपि नूतनाः दिशाः सम्मिलन्ति ।

पठनं नाम विद्याभ्यासस्य प्रमुखं सोपानम् ।

पठनं नाम काचित् कला यया जीवनस्य सौन्दर्यम् अपूर्वया शोभया प्रकाशते ।

पठनं नाम गवाक्षः येन विश्वस्य सर्वे ज्ञान-सौर-किरणाः अस्माकं बुद्धिं दीपयन्ति ।

किं बहुना-पठनं विना न विद्या, न शिक्षणं, न विज्ञानं, नापि चिन्तनम् ।

जीयात् पठनाभिरुचिः ।

४. ग्रन्थालयः

ग्रन्थानां सङ्ग्रहेण जनतायाः ज्ञानं विकासयन् आलयः ग्रन्थालयः इति अभिधीयते ।

प्राशासनिकः ग्रन्थालयः, सार्वजनिकः ग्रन्थालयः, अ-राजकीयः (private) ग्रन्थालयः - इत्यादि रूपैः ग्रन्थालयाः बहुविधाः वर्तन्ते ।

ग्रन्थालयेषु सङ्गृहीतानां ग्रन्थाः "एतावन्तः एव" इति सङ्ख्यासङ्कोचं कर्तुं न शक्यते । तत्र केवलं पञ्चशतं ग्रन्था एव स्युः, आहोस्वित् (=अथवा) पञ्चलक्षं ग्रन्थाः स्युः - परन्तु ग्रन्थालयस्य उपयोगः जनतया कथं क्रियते इत्यनेन ग्रन्थालयस्य महत्त्वं ज्ञायते - न तु तत्र सङ्गृहीतानां ग्रन्थानां सङ्ख्यया ।

आदर्शग्रन्थालयस्य स्वरूपम् एवं भवति - तत्र दारुमयीषु ग्रन्थधानीषु (Book shelves) वर्गीकृतविषयाणाम् अनुसारेण ग्रन्थाः स्थाप्यन्ते । कुत्र कुत्र कः को ग्रन्थः उपलभ्यत इति विस्पष्टं सूचनार्थं ग्रन्थनाम्नां वर्गीकृता पट्टिका - एकस्मिन् पुस्तके रचिता - स्थाप्यते । अपि च पत्रक-परिशिष्टम् (=card index) अपि ग्रन्थालये वर्तते यत्र ग्रन्थरचयितृनाम्नां ग्रन्थनाम्नां च विवरणानि पत्रकेषु लिख्यन्ते तानि च अकारादिक्रमेण संयोज्य पाठकानाम् उपयोगार्थं स्थाप्यन्ते । (= निधीयन्ते)

केवलं नाम्नां (ग्रन्थनाम्नां रचयितृ-नाम्नां च) सूचनया प्रयोजनं न भवति । सर्वेषाम् अपि ग्रन्थानां क्रमाङ्कः, विषयाङ्कः - एवम् अङ्कद्वयं दातव्यम् । अङ्कक्रमेण ग्रन्थधानीषु (Book shelves) ग्रन्थाः स्थापनीयाः । एतेन झटिति अभीष्टस्य ग्रन्थस्य प्राप्तिः सुलभा भवति ।

प्रायेण विश्वविद्यानिलयानां, विद्यालयानां, प्रौढशालानां, माध्यमिकशालानां प्राथमिकशालानां च ग्रन्थालयाः विद्यार्थि-

विद्यार्थिनीभ्यः पाठक-पाठिकाभ्यः च विना किमपि शुल्कं ग्रन्थान् निर्दिष्टम् अवधिं यावत् यच्छन्ति, प्रतिस्वीकुर्वन्ति च । परन्तु सार्वजनिकेषु ग्रन्थालयेषु न्यासशुल्कं (deposit) दत्वा ग्रन्थालयस्य सदस्यत्वं प्राप्तव्यम् । तत एव ग्रन्थान् ग्रन्थालयात् ऋणरूपेण (borrow) स्वीकर्तुं शक्यते ।

अस्माकम् अभीष्टानां सर्वेषां ग्रन्थानां सङ्ग्रहं कदाचित् ग्रन्थ-क्रय-द्वारा अस्माकं गृहेषु कर्तुं न शक्नुमः । तादृशे प्रसङ्गे ग्रन्थालयाः एव अस्माकं शरणम् ।

ग्रन्थालयाद् ग्रन्थचौर्यं, ग्रन्थेषु वर्तमानानां चित्रादीनाम् अपहरणं, ग्रन्थधानीषु ग्रन्थ-स्थानान्तरणं, ग्रन्थप्रत्यर्पणस्य अ-करणम् इत्यादयः ग्रन्थालयसदस्यानां दोषाः ।

निर्दिष्टे एव अवधौ विना विलम्बं ग्रन्थानां प्रत्यर्पणं, ग्रन्थे कस्यापि टिप्पण्यादिकस्य अ-लेखनं, प्रामाणिकता इत्यादयः ग्रन्थालयसदस्यानां गुणाः ।

५. वनम्

प्रकृत्या एव वर्धितानां वृक्षाणां निबिडः समुदायः यस्मिन् विशाले भूभागे दृश्यते, सः भूभागः वनम् इत्युच्यते ।

वनं, काननम्, अरण्यं, विपिनम्, अटवी एतानि सर्वाण्यपि पदानि पर्यायपदानि । (=अर्थदृष्ट्या निकटं स्थातुमर्हाणि पदानि)

वनं न केवलं वृक्षाणां समुदायः । यद्यपि ''वनम्'' इति शब्दं श्रुत्वा अस्माकं मनसि वृक्षाणाम् आकाराः स्फुरन्ति; तथाऽपि वनं

नाम गुल्मानां, लतानां, खगानां, पशूनाम् अष्टापदानां (ऊर्णनाभिप्रभृतीनाम्) अणुजीविनां च निवासस्थानम् । एतावदेव न, वनवासिनः जनाः अपि वनस्य प्रमुखम् एव अङ्गम् ।

वनानाम् उपयोगः बहुविधः । वृक्षेभ्यः दारु क्रियते, येन पीठोपकरणादीनि निर्मीयन्ते । बहूनि ओषधिसस्यानि वने लभ्यन्ते । वनस्य ऊर्ध्वभागीयः वायुः सदा शीतलः भवति । तदीयस्य शैत्यस्य कारणात् मेघाः जलाकारं प्राप्नुवन्ति, भूमौ बिन्दुधारारूपेण पतन्ति च । एतदेव वृष्टिः इत्युच्यते । एवं रीत्या वनानां प्रयोजनानि अनेकानि सन्ति ।

६. दरिद्रता

सर्वेभ्यः मानवेभ्यः आहारः, वसतिः, वस्त्रम्, एतानि त्रीणि जीवनावश्यकानि साधनानि । एतानि लब्धुं पर्याप्तं धनं येषां नास्ति ते दरिद्राः । तेषां स्थितिः "दरिद्रता" ।

दरिद्राणां सद्गुणान् न कोऽपि पश्यति । दरिद्राणां कोपं वा प्रीतिं वा जनाः न परिगणयन्ति ।

दरिद्राः यदि परगृहे सततं वसन्ति ते तिरस्कारवचनभागिनः भवन्ति ।

यदि सत्यमुच्यते, क्रूरैः, मृगैः सेवितेषु अरण्येषु वासः अपि वरं, किन्तु जनमध्ये धनहीनता न वरम् ।

''दारिद्र्यात् मरणम् एव प्रशस्तम्'' इति कश्चित् कविः कथयति । यतः मरणे केवलम् अल्पः क्लेशः । दारिद्र्ये महद् दुःखं- तदपि अन्तरहितम् ।

तस्मात् कारणात् वयम् आशास्महे यत् कोऽपि दरिद्रः न भूयात् । सर्वेषामपि जनानां जीवनावश्यकानि साधनानि प्राप्तुं पर्याप्तं धनमस्तु ।

७. सज्जनाः

प्रसङ्गवशात् अल्पम् उपकारं कुर्वाणाः जनाः बहवः सन्ति । किन्तु सदाऽपि परेषां हितचिन्तनम् एव कुर्वाणाः, लोके सततं शुभेषु कर्मसु एव आसक्ताः विरलाः दृश्यन्ते । तादृशा विरला जनाः ''सज्जनाः'' ।

सज्जनाः ईदृशाः मृदु-स्वभावयुक्ताः यत् परेषां क्लेशे जाते स्वयं द्रवन्ति, यथाशक्ति तेषां क्लेशस्य निवारणाय प्रयतन्ते च ।

सज्जनाः लोके जायमानाम् अनीतिं न सहन्ते । स्वेषां कृते अन्याय्यम् आचरन्तं जनं ते क्षाम्यन्ति; किन्तु समाजस्य उपद्रवं कुर्वाणान् जनान् ते कदाऽपि न क्षाम्यन्ति ।

अन्यायकारिणः जनाः कस्मिन्नपि स्थाने सन्तु नाम, तेषां पदवीं, वैभवं च सज्जनाः न परिगणयन्ति । जनतायाः सहकारेण वा, स्वयम् एकाकिनः सन्तः वा अन्याय्यं प्रतिभटन्ति ।

कुत्सिताः विचाराः, अपरेषाम् अनावश्यकं निन्दनं, क्षुद्राः प्रवृत्तयः रागद्वेषादयः दुर्गुणाः - एतेषु अन्यतममपि सज्जनेषु न दृश्यते ।

तस्मात् कारणादेव ते "सज्जनाः" ।

८. मम उत्तमं मित्रम्

मम बहूनि मित्राणि सन्ति । तेषाम् उत्तमं मित्रं हरिमोहनः । सः मम बाल्यात् परिचितः ।

प्रायेण सः हसन्मुखः । कदाऽपि तं क्रुद्धं न स्मरामि । मया अपराधे कृते सः तथा तं सूचयति यथा मम मनसि तीव्रः कोपः अपि न जायते, तत ऊर्ध्वं तम् अपराधमपि न करोमि ।

सः सदाऽपि तीव्राध्ययनेषु निरतः । सर्वासु परीक्षासु प्रथमं स्थानं लभते । अध्ययनविषये सः एव ममादर्शः ।

क्रीडास्वपि तस्य आसक्तिः कुतूहलकरी । सर्वासु क्रीडास्पर्धासु भागं गृह्णाति । कदाचित् क्रीडासु तस्य प्रथमस्थानं न प्राप्यते । किन्तु एतेन सः म्लानवदनः न भवति ।

कदाचित् ज्वरः, माम् अबाधत । तदा शालां गन्तुम् अहं न अशक्नवम् । हरिमोहनः प्रत्यहं मम गृहम् आगत्य मृदुमधुरैः हर्षोत्तेजकैः संलापैः मम नीरसताम् अपानयत् । अहं त्वरिततरं उल्लाघः (convalescent) सञ्जातः ।

सः सदाऽपि सत्यं भाषते । आचार्येषु विनयेन व्यवहरति । स्वस्य मातापित्रोः विषये गौरवं प्रदर्शयति ।

एतैः कारणैः हरिमोहनः मम उत्तमं मित्रम् अस्ति ।

९. सत्यस्य महिमा

‘‘सत्यान्नास्ति परो धर्मः’’ - इत्येवं काचन सूक्तिः सत्यस्य महिमानं व्यनक्ति । ‘‘सत्यमेव जयते नानृतम्’’ इत्यपि उपनिषदि घुष्टमस्ति ।

सर्वे मतधर्माः विश्वस्य सर्वा अपि संस्कृतयः सत्यमेव वक्तुं जनान् प्रचोदयन्ति ।

सत्यस्य मार्गः कठिनः । हृदयशुद्धिं विना तस्मिन् मार्गे कोऽपि जनः पथिकः भवितुं न शक्नोति । श्रद्धया सत्यमार्गे गच्छतां जनानां सम्मुखे क्लिष्टाः परीक्षाः तिष्ठन्ति ।

ये मितं भाषन्ते ते प्रायेण सत्यभाषिणः । अमितं ये भाषन्ते तेषां सत्यमार्गः दुष्करः ।

सत्यमार्गे महात्मानः चलित्वा लक्षशः श्रद्धालुभ्यः मार्गम् अदर्शयन् ।

सत्यवचनं क्वचित् प्रियं न भवति किन्तु तत् पथ्यं भवति ।

१०. समुदाचारः

यां काञ्चन व्यक्तिं प्रति अस्माभिः यदि समुदाचारः न प्रदर्श्यते सः-समुदाचाराभावः न्यायालये विचारणीयः अपराधः न भवति । यतः सभ्यः आचारः न्यायालयस्य न्यायानां परिमितौ न आयाति ।

उदाहरणार्थं परिचितानां गौरवार्हाणां दर्शनानुपदं 'नमस्ते' इति कथनं, विनयेन वर्तनम्, अतिथिभ्यः स्वागतं, स्नेहेन सर्वत्र व्यवहारः -इत्यादिकः यः समुदाचारः सः अस्माभिः स्वयमेव अनुष्ठेयः । तत्र न्यायालयसम्बद्धः कोऽपि विधिः नास्ति ।

समुदाचारेण व्यक्तीनां मध्ये स्निग्धः सम्पर्कः स्थानं प्राप्नोति । मृदु-मधुराणां सौजन्ययुतानां व्यवहाराणां मन्दमारुतः सर्वत्र वाति । द्वेष-क्रोधादिदुर्गुणाः अदृश्याः भवन्ति । प्रियाणाम् एव वाक्यानां कथनेन सर्वेषां सन्तोषः जायते ।

"कृपया", "क्षम्यताम्", "अनुगृह्यताम्" इत्यादीनां समुदाचारव्यञ्जकानां पदानाम् उपयोगेन नीचभावानाम् अवसराः दूरीभवन्ति । एवं समुदाचारः सदा गौरवयोग्यः सद्गुणः ।

११. अतिथीनां धर्मः

पूर्वस्मिन् काले-विना कामपि प्राक्सूचनां- बन्धूनां मित्राणां वा गृहं ये जनाः प्रविशन्ति स्म तेषां सदाऽपि हार्दं स्वागतं दीयते स्म ।

तस्मिन् काले जनसङ्ख्या न्यूना आसीत् । सामाजिकानि सङ्कष्टानि विरलानि आसन् । अपि च 'अतिथिदेवो भव' इति मन्त्रः सश्रद्धम् अनुष्ठीयते स्म । प्रवासं कर्तुमिच्छतां जनानां कृते तृप्तिदायिन्यः निवासव्यवस्थाः नगरेष्वपि प्रायेण नैव आसन्,

परन्तु अधुना सर्वमेतत् परिवर्तितम् । ग्रामेष्वपि अद्यत्वे निवासव्यवस्थाः वर्तन्ते । आगमनसूचनां पत्रद्वारा दूरवाणीद्वारा वा

कर्तुम् अतिथीनां शक्यत एव। तदा च आतिथेयाः जनाः झटिति प्रतिक्रियां कर्तुं शक्नुवन्ति। अर्थात्- अतिथीनामागमनसमय एव तैर्यदि कुत्रापि गन्तव्यं भवति, ते तथा सूचयन्ति, यदि तथा न- अतिथीनाम् आवासादिव्यवस्थां कर्तुं ते शक्नुवन्ति।

प्राक्सूचनां विनैव कस्यापि जनस्य गृहे निवासार्थम् अनेक-जनानां युगपत् (= simultaneously) गमनं, भोजनादिविषये आतिथेयजनेषु क्लेशोत्पादनम्, आतिथेयानाम् आर्थिकीं परिस्थितिम् अविगणय्य (not considering) बहुदिनानि यावत् आतिथेयगृहे निवसनम् - इत्यादयः दोषाः अतिथीनां विषये आतिथेयानां मनसि अगौरवं सञ्जनयन्ति।

केचित् अतिथयः स्वशिशून् अपि आतिथेयानां गृहं नयन्ति; स्वशिशुः "तादृशः, एतादृशः" इति स्तोत्रं कुर्वाणाः आतिथेयस्य कर्णौ बधिरीकुर्वन्ति।

अप्रासङ्गिकस्य वार्तालापस्य अ-करणम्, आतिथेयस्य जनस्य गृहीयवस्तूनां भङ्गस्य अकरणं, भोजनादिव्यवस्थासु क्लेशस्य अनुत्पादः, कार्यसमाप्तौ च शीघ्रम् आतिथेयजनस्य गृहाद् निर्गमनम् - इत्यादयः अतिथीनां सद्गुणाः, धर्माश्च।

१२. पक्षिणः

मनुष्यस्य हार्दिकीनाम् आकाङ्क्षाणां मध्ये, पक्षी इव आकाशे डयितुं या आकाङ्क्षा, सा बलवती।

पक्षौ एव ''पक्षी'' इति नामधेयं पक्षिणे दत्तवन्तौ । मेघान्तरालेषु कस्यापि आधिपत्यं विना स्वच्छन्दं डयमानान् पक्षिणः दृष्ट्वा कस्य जनस्य तेभ्यः असूया न जायते ?

पक्षिणः नीडं निर्माय, तत्र अण्डानि निदधति । एतत् आश्चर्यम् । ते अण्डानि उष्णीकुर्वन्ति । एतत् आश्चर्यतरम् । अण्डानि भित्वा लघवः पोताः बहिः आगच्छन्ति, ''च्यू च्यू'' ''किचपिच'' इति मातापितृभ्यां साकं सम्भाषन्ते । एतत् आश्चर्यतमम् ।

केचन पक्षिणः अतीव दीर्घान् पक्षान् बिभ्रति-उदाहरणार्थम् आल्बट्रास् । केचन पक्षिणः अतीवलघून् पक्षान् बिभ्रति-उदाहरणार्थं झेङ्कारपक्षी (हम्मिंग्बर्ड्) ।

पक्षिणां वर्णविन्यासाः अपि अत्यन्तम् अद्भुताः ।

अहमपि पक्षी भूत्वा आकाशे डयेय- एषः मम स्वप्नः ।

१३. मम शाला

मम शालायाः नामधेयं ज्ञानविहारप्रौढशाला । मैसूरुमार्गे तृतीये उपपथे मम शालाऽस्ति ।

मम शाला नातीव प्राचीना । पञ्चदशवर्षाणि स्थापितायाः मम शालायाः । प्रारम्भे शालायां ग्रन्थालयस्य सौकर्यं नासीत् । किन्तु अधुना अत्यन्तं सुसज्जितः ग्रन्थालयः शालायाम् अस्ति ।

नगरस्य सीमाभागे मम शालाऽस्ति । तस्मात् कारणात् नगरे दृश्यमानः जनसंमर्दः शालां परितः न दृश्यते । मम गृहात्

किञ्चिदिव दूरेऽस्ति शाला । तस्मात् कारणात् चलित्वा शालां प्रति गमने महान् विलम्बः स्यादिति कृत्वा अहं यानद्वारा शालां प्रत्यहं गच्छामि । यानं यथाकालं मां शालां प्रापयति ।

निर्दिष्टे समये प्रार्थनायाः कृते सर्वान् छात्रान् आह्वातुं घण्टा वाद्यते । वयं सर्वे विद्यार्थिनः प्रार्थनासभायां पङ्क्तिशः तिष्ठामः । प्रार्थनानन्तरं शालायाः कक्ष्यां प्रविशामः । सर्वाः अपि कक्ष्याः विशालाः । गवाक्षद्वारा प्रकाशः सम्यगन्तः प्रविशति ।

शालायाः अग्रे कश्चित् महान् शिरीषवृक्षः स्वकीयेन भव्येन आकारेण सदा अस्मभ्यं शुभम् आशास्ते । मध्याह्ने यदा उपहारविरामः लभ्यते तदा वयं सर्वेऽपि विद्यार्थिनः तस्य शिरीषवृक्षस्य च्छायायाम् उपविश्य अस्माभिः आनीतानि भोजनीयवस्तूनि खादामः । ग्रीष्मकाले यदा वातावरणं सर्वत्र अत्यन्तमुष्णं भवति तदाऽपि अस्माकं शालायां हितः वायुः वाति । तत्र कारणं पूर्वोक्तः शिरीषवृक्षः । शिरीषवृक्षः उत्कृष्टः छायावृक्षः।

मम शालायां पाठानाम् अध्ययनाय यथा पर्याप्तः प्रोत्साहः दीयते गुरुभिः, तथैव क्रीडासु भागग्रहणाय अपि ।' शालायाः सर्वे शिक्षकाः स्वकीयेषु अध्ययनविषयेषु विद्वांसः, बोधने दक्षाः च ।

शालायाः इदानीन्तनः मुख्योपाध्यायः श्रीमान् ज्ञानसागरः । सः यथा शालायाः शासनविभागं पर्यवेक्षते तथा प्रवचनभारम् अपि निर्वहति । तस्य विषयः संस्कृतम् । अतीव रुचिरया शैल्या सः तथा पाठान् पाठयति यथा समयः अतीतः नैव लक्ष्यते ।

शालायाः सर्वेऽपि विद्यार्थिनः सदा अध्ययने मग्नाः न भवन्ति। केभ्यश्चन विद्यार्थिभ्यः अध्ययनं न रोचयते । किन्तु तादृशानां विद्यार्थिनां सङ्ख्या अल्पीयसी ।

अन्ते इदं वक्तुं शक्यते यत् मम शाला आदर्शमयी, अध्ययनाय च प्रोत्साहकरी काचित् प्रशस्ता संस्था ।

१४. उन्नतः शिक्षकः

यदा अहं कस्याञ्चन प्रौढशालायां शिक्षकः अभवं तदा मम मनसि बहवः संशयाः उत्पन्नाः । ''किं नूनमपि अहम् आदर्शः शिक्षकः भवेयम्, अथवा सर्वेषां विद्यर्थिनाम् असमाधानं सृजेयम्? यदि शालायां कोऽपि आदर्शशिक्षकः अस्ति तस्य मार्गम् अनुसर्तुं शक्नुयां वा न वा'' इत्यादीत्यादि ।

किन्तु अदृष्टवशात् तस्यां प्रौढशालायां बहवः शिक्षकाः उत्कृष्टस्तरीयाः आसन् । तेषां मार्गदर्शनेन अहमपि शिक्षकवृत्तौ प्रेम समपादयम् । तेषां अन्यतमः डा. बुद्धिमान् । तस्य विचारं कञ्चित् प्रस्तोतुं मम अतीव आनन्दः जायते, यस्य जीवनरूपं मां प्रतिपदम् उत्कृष्टं स्तरम् अनयत् ।

डा. बुद्धिमान् इङ्ग्लिष्भाषायाम् एम्.ए. पदवीं सम्पादितवानस्ति । वर्ड्स्वर्त् विचारे संशोधनप्रबन्धं लिखित्वा डाक्टरेट् पदवीम् अपि प्राप्तवानस्ति । इङ्ग्लिष्भाषायां तावन्तं स्तरं प्राप्तवानपि सः प्रत्यहं गृहे तत्तद्दिनेषु प्रवचनीयं पाठं सम्यक् अभ्यस्यति । पूर्वाभ्यासेन विना सः कदाऽपि कक्ष्यां न प्रविशति ।

प्रवचनसमये सः अतिगम्भीरः इति यद्यपि सत्यं, तथाऽपि सः मध्येप्रवचनं विनोदकणिकाः स्वारसिकान् प्रसङ्गांश्च निदर्शयन् विद्यार्थिनाम् अवधानं प्रवचन-केन्द्रितं करोति । विद्यार्थिभिः पृच्छ्यमानानां सर्वेषां प्रश्नानाम् उत्तरं सहनया ददाति । कीदृशो वाऽपि स्यात् प्रश्नः, गम्भीरो वा कुचोद्यो वा सः कदाऽपि स्वस्य सहनां न अपनयते ।

तस्य अभिरुचिः केवलं न पाठप्रवचने एव अपि तु क्रीडास्वपि । शालायाः क्रीडाविभागस्य सः एव अध्यक्षः । तस्य नेतृत्वे शालाविद्यार्थिनः बह्वीषु स्पर्धासु भागं गृहीत्वा पारितोषिकाणि प्राप्तवन्तः सन्ति ।

वेतनदृष्ट्या अधिकाकर्षकान् उद्योगान् समवाप्तुं सः शक्नोति । किन्तु, तस्यैव वचनानुसारेण ''शिक्षकवृत्तौ वयं यथा अस्माकं ज्ञानम् अभिवर्धयितुं शक्नुमः तथा अन्यत्र कुत्रापि न'' ।

एतैः कारणैः सः मम कृते सदा उन्नतः शिक्षकः अस्ति ।

१५. शालायाः वार्षिकोत्सवः

अस्माकं शालायाः वार्षिकोत्सवः ऐषमः (=अस्मिन् वर्षे) फेब्रुवरी मासस्य द्वादशदिनाङ्के प्राचलत् ।

वार्षिकोत्सवविषये वयं सर्वेऽपि विद्यार्थिनः, विद्यार्थिन्यः, शिक्षकाः, शिक्षिकाः च सकुतूहलं स-श्रद्धं च पूर्वसिद्धताः अकरवाम ।

वार्षिकोत्सवे भाषणानि आयोजयितुं मुख्योपाध्याया, सांस्कृतिककार्यक्रमान् सम्यग् घटयितुं शिक्षकवर्गः, वेदिकालङ्काराय छात्रगणः - इत्यादीत्यादि ।

वार्षिकोत्सवः समारब्धः । आदौ कु ॥ शशिकला तथा चि ॥ माधवः - प्रार्थनागीतं गीतवन्तौ । तयोः कण्ठः सुमधुरः आसीत् । स्वागतभाषणं मुख्योपाध्याया श्रीमती मालिनीदेवी कृतवती । मुख्यातिथेः श्री गौरवेश्वरस्य तथा अध्यक्षस्य श्री सिन्धुमण्डलस्य परिचयं संस्कृताध्यापकः श्रीमान् भारतीशः अकारयत् । ततः विद्यार्थिसङ्घस्य कार्यदर्शी श्री मुरलीमोहनः ऐषमः (=अस्मिन् वर्षे) अस्माकं प्रौढशालाविद्यार्थिभिः विविधासु राज्यस्तरीयासु अन्ताराष्ट्रियस्तरीयासु च स्पर्धासु किं किं साधितम् इति सम्यक् निरूपितवान् । ऐषमः अस्माकं शालया विविधासु स्पर्धासु ३२ सुवर्णपदकानि १३ रजतपदकानि तथा १९ कांस्यपदकानि च लब्धानि । एतत् श्रुत्वा सर्वेषां सभासदां मुखतः सन्तोषोद्गारः प्रकटीकृतः । परुत् (=गते वर्षे) अस्माकं शालायाम् एस्.एस्.एल्सि परिणामः प्रतिशतं ९३ इति च ज्ञात्वा सर्वे प्रसन्नाः अभवन् ।

ततश्च विविधासु क्रीडास्पर्धासु तथा इतरासु च स्पर्धासु (सङ्गीतं, नृत्यं, कण्ठपाठः, विविधवेषाः, आशुभाषणं, चित्रं, प्रबन्धलेखनं, रसप्रश्नाः) जयं प्राप्तवतीभ्यः विद्यार्थिविद्यार्थिनीभ्यः पारितोषिकवितरणम् अतिथिमहाशयेन स्वामृतहस्तेन कृतम् ।

तदनन्तरं मुख्यातिथिः छात्रजनान् सर्वानुद्दिश्य हितवचनानि उपादिशत् । विद्यायाः महिमा, शिक्षणस्य ध्येयं, विविधेषु उद्योगेषु विद्यापदवीषु वा प्रवेशावकाशः, ततः सश्रद्धं समाजे कस्यचन क्रियाकलापरूपस्य ध्येयस्य साधनम्, आत्मविश्वासः - एतान् विषयानधिकृत्य सः सुष्ठु अभाषत । अध्यक्षमहाशयश्च तदनन्तरं भाषमाणः जनजीवने विद्यार्थिनः उत्तरदायिनः भूयासुः (=[illegible]) इति उपादिशत् । मुख्यातिथेः तथा अध्यक्षस्य भाषणं बोधप्रदम्, आत्मविश्वासवर्धकं चैतन्योत्पादकञ्च आसीत् । एस्.एस्.एल्.सि. विद्यार्थिनी वनजाक्षी वन्दनानि समार्पयत् । कार्यक्रमस्य निरूपणं नवमकक्ष्यायाः छात्रः मोहनः अकरोत् ।

ततः सांस्कृतिककार्यक्रमाः प्रदर्शिताः । शास्त्रीयं गायनं, भावगीतानां गायनं, जानपदं नृत्यं, शास्त्रीयं भरतनाट्यं, विनोदमयानि सम्भाषणानि, ततः 'उत्कोच-साम्राज्यम्' इति हास्यमयं नाटकम् - एतत् सर्वम् उत्कृष्टम् आसीत् ।

अन्ते हर्षोल्लासैः साकं सर्वेषामपि विद्यार्थिजनानां मनसि विषादोऽपि अनुभूतः । यतः एतावत्पर्यन्तं सहैव यैः क्रीडितम् अधीतं, विनोदितं, हसितं, भाषितं, चर्चितं, कष्टसुखयोः परस्परेण अभिव्यञ्जनञ्च कृतं तैः अधुना (परीक्षानन्तरं) भिन्नाः मार्गाः आश्रयणीयाः । को जानाति - कः कस्मिन् क्षेत्रे कार्यनिरतो भविष्यतीति ! परन्तु एतदेव हि जीवनम् !

१६. मम गृहम्

मम गृहं मैसूरुनगरे लक्ष्मीपुराख्यविस्तरणे अस्ति । बाह्यस्वरूपेण एतत् न तथा आकर्षकं यथा धनिकानां भव्याः सौधाः । किन्तु मध्यमवर्गीयाणाम् अल्पायवतां वास-सौकर्याय एतत् पर्याप्तम् ।

गृहं किञ्चिदिव प्राचीनम् । गृहनिर्माणकाले पर्याप्तप्रमाणेन वज्रचूर्णं (=सिमेण्ट्) न लभ्यते स्म । तस्मात् कारणात् मम पिता गारकेन एव गृहं निर्मापयामास । गारकेन निर्मितम् अपि मम गृहं तथा दृढं स्थिरं च यथा सिमेण्ट्निर्मितानि अपि गृहाणि अद्यत्वे तथा न दृढानि ।

गृहं परितः उद्यानं वर्धयितुं मम मातुः हार्दिकी बलवती च आकाङ्क्षा आसीत् । किन्तु अपेक्षितमात्रया स्थलं तत्र नास्ति । लब्धे एव अल्पावकाशे मल्लिका, पारिजातः, तरुणीपुष्पं(= Rose), कुन्दः एते वृक्षकाः मात्रा रोपिताः ।

धनिकानाम् अपि गृहेषु दुर्लभं किञ्चिद् वस्तु मम गृहे अस्ति । तत्तु दोला !

मम गृहे चतस्रः कक्ष्याः सन्ति । एका शयनाय, अन्या अतिथिस्वागत-करणाय, अपरा च अध्ययनाय उपयुज्यते । शयनार्थं चतुर्थी कक्ष्या उपयुज्यते ।

गृहस्य समीपे एव विपणिः अस्ति । तस्मात् कारणात् अस्माभिः शाक-फलादि-क्रयार्थं सुदूरं गन्तव्यं नास्ति ।

१७. मम देशः

यत्र राजा अशोकः धर्मस्य सन्देशं सर्वदिशं घुष्टवान्, यत्र अहिंसा जीवनस्य परमः मन्त्रः, तत्र भारतदेशे अहं जातोऽस्मि इति कारणात् मम महान् गर्वः अस्ति । विश्वस्मिन् अन्यस्य कस्यापि राष्ट्रस्य विषयः मम न तथा अतीव हृदयङ्गमः यथा मम मातृभूमेः भारतस्य विषयः । दिवारात्रं मम देशस्यैव अद्भुतान् विचारान् चिन्तयामि ।

अलेग्साण्डर्वर्यस्य आक्रमणेन भारतीयाः न अपमानिताः अभवन्, प्रत्युत भारतीयानां पराक्रमेण स्वयं स एव विस्मितः अभवत् । राजानः विविधैः कारणैः प्रेरिताः परस्परेण अयुध्यन्त इति यद्यपि सत्यं, तथाऽपि– ते कदाऽपि प्रजाहिंसनं नैव अकुर्वन् ।

दिल्लीनगरम् अस्माकं देशस्य राजधानी । इतिहासकालतः एव दिल्लीनगरम् अतीव प्रसिद्धमस्ति । अधुना तु प्राचीनदिल्लीनगरस्य नातिदूरे नवदिल्ली शोभते । विशालाः मार्गाः, भव्यानि वास्तूनि च नगरमिदम् अलङ्कुर्वन्ति ।

अस्माकं मातृभूमौ बह्व्यः भाषाः, बहवः आचाराः, विविधाः वेषाः च सन्ति । तथाऽपि वयं सर्वेऽपि भारतीयाः इति इयं भावना अस्मान् सर्वानपि एकीकृत्य देशस्य प्रगत्यै मार्गं प्रदर्शयति ।

बहुशः भारते यथाऽधिकसङ्ख्यया विविधजनवर्गीयाः सन्ति मन्ये- तथा विश्वस्मिन् अन्यत्र कुत्रापि न सन्ति । तथाऽपि एतेषु भेदेषु एकता अस्त्येव ।

दीर्घाः नद्यः, मनोहराः मृगपक्षिणः सस्यश्यामलानि वनानि, अद्भुतः राजकीयेतिहासः - एतत् सर्वं मम देशस्य विषये मम गौरवभावनाम् अधिकीकरोति ।

'भारतीयाः केवलम् अध्यात्मप्रियाः, लौकिकविचारेषु तथा विज्ञानविषयेषु तेषाम् आसक्तिः न्यूना' इति पूर्वं काचित् प्रतीतिः आसीत् । सा प्रतीतिः अधुना असत्यीभूता । अस्माकं वैज्ञानिकाः कृतकानाम् उपग्रहाणां निर्माणे तथा तेषां उड्डायने च समर्थाः । न केवलम् एतावदेव, परन्तु पूर्वस्मिन्नपि काले भारतीयैः विज्ञानसम्बद्धाः महत्यः सिद्धयः साधिताः इत्यत्र बहूनि प्रमाणानि लब्धानि ।

भारते समस्या काऽपि नास्तीति न । किन्तु कस्मिन् राष्ट्रे काऽपि समस्या नास्ति?

यदि सत्यमुच्यते, इतिहासदृष्ट्या, सारस्वते प्रपञ्चे साधितानां सिद्धीनां दृष्ट्या, वैविध्य-मय-जन-वर्गीय-दृष्ट्या च मम हृदये भारतं शाश्वतं स्थानं प्राप्तवत् अस्ति ।

१८. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

एष श्लोकः कुत्रत्य इति स्पष्टं न ज्ञायते । अस्य श्लोकस्य पूर्वार्धः एवं वर्तते– ''अपि स्वर्णमयी लङ्का न मे लक्ष्मण ! रोचते ।'' (अयोध्यायाः स्मरणं कुर्वन् रामः लक्ष्मणं प्रति एवं ब्रवीति ।)

स्वग्रामे स्युः बहवः दोषाः, परन्तु स्वग्रामे गुणा अपि बहवः सन्ति । उद्योगार्थं स्वदेशं त्यक्त्वा सुदूरतरान् देशान् केचन

गच्छन्ति। परन्तु बाल्यकालिकानि मधुराणि स्मरणानि तेषां मनसि सदा क्षोभं जनयन्ति । तादृशः क्षोभः nostalgia (गृहस्मरणेन प्रतिनिवर्तनाय उत्कटता) इति इङ्ग्लीष्भाषायाम् अभिधीयते । स्वदेशः अत्यन्तं पवित्रः इति तेषां मनसि भासते ।

कदाचित् अमेरिकादेशे सञ्चारं कुर्वाणं विवेकानन्दं कश्चन अमेरिकीयः जनः अपृच्छत्– ''अमेरिकादेशः सम्पद्युक्तं राष्ट्रम् । अधुना अत्र सञ्चारानन्तरं दरिद्रस्य भारतराष्ट्रस्य विषये भवतः को विचारः वर्तते?'' विवेकानन्दः उक्तवान्– ''अधुना भारतस्य सर्वोऽपि मृत्-कणः मम पवित्रः प्रतिभाति'' ।

या माता जनान् प्रसूतवती, या च वात्सल्येन पोषितवती या च– सत्यपि दोषे - क्षाम्यति अथवा - केवलं शिशूनां विवेकवृध्यै निन्दति - सा माता जगति सर्वेषाम् आनन्दाय। मातृसदृशं किमपि अन्यद् वस्तु जगति नास्त्येव ।

स्वकुटुम्बीयेभ्यो जनेभ्यः स्वदेशाच्च दूरं यदा वयं गच्छामः तदा सर्वप्रथमम् अस्माकं मनसि आकारं प्राप्नुवाना मूर्तिः जनन्याः एव। तस्मादिदं साधु उच्यते – ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इति ।

१९. कृषीवलः

अस्माकं राष्ट्रे नगर-सङ्ख्यापेक्षया ग्रामसङ्ख्या एवाधिका । पञ्चलक्षाधिकाः ग्रामाः अस्माकं देशे सन्तीति कश्चन अभ्यूहः वर्तते । ग्रामेषु कुम्भकाराः चर्मकाराः इत्यादयः भिन्न-भिन्न-वृत्तिषु

वर्तमानाः गोचरीभवन्तीति यद्यपि सत्यं, तथाऽपि ''ग्रामः'' इति शब्दं श्रुत्वा अस्माकं नेत्रयोः पुरस्तात् कृषीवलस्यैव जीवनं स्फुरति ।

कृषीवलस्य जीवनम् इतरोद्योगवताम् अपेक्षया कठिनतरम् । सः प्रतिदिनमपि क्षेत्रे बीजानि वपन्, अथवा कीटनाशकद्रव्याणि सिञ्चन् अथवा उद्बल्यं[१], विकिरन् दृश्यते । तस्य जीवनं यद्यपि न सुलभम्, तथापि सः स्वस्य जीवन एव आनन्दम् अनुभवति । सः सदाऽपि श्रमेण कार्यं करोति । तस्मात् सः सर्वैः जनैः पूज्यते ।

सः प्रतिदिनं प्रातः शय्यातः उत्तिष्ठति । हलं, वृषभौ च क्षेत्रं नयति । घण्टाशः सः क्षेत्रं कर्षति । मध्याह्ने तत्कुटुम्बीयैः आनीतानि भोजनीयवस्तूनि भुङ्क्त्वा कञ्चित् समयं विश्राम्यति । पुनः सः स्वस्य उद्योगे मनः आदधाति ।

तस्य दैनन्दिनं जीवनम् अतीव सरलं भवति । तस्य वेषभूषणादीनि स्वाभाविकतायां तदीयं प्रेम प्रकटयन्ति ।

सः स्वकीयम् उद्योगम् अत्यन्तं रोचयते । यतः सः सम्यगेव जानाति यत् देशस्य सर्वाः प्रजाः आहारं लब्धुं तम् एव अवलम्बन्ते । तस्मात् कारणात् स्वीयस्य उद्योगस्य विषये तस्य हृदये महान् अभिमानः जागर्ति । कृषीवलस्य इमम् उत्कृष्टम् अंशं ज्ञात्वा एव केनापि उक्तम् ''अन्नदाता कृषीवलः'' इति ।

---

१. उद्भिज्ज - बल्यं = tonic of plants = manure = ಗೊಬ್ಬರ

२०. कुम्भकारस्य आत्मवृत्तम्

''कुम्भं करोति इति कुम्भकारः'' इत्येवं रूपेण कुम्भकार शब्दस्य विग्रहवाक्यम् अतीवसुलभं वदन्ति विद्यार्थिनः । किन्तु यथा विद्यार्थिनः कुम्भकारशब्दस्य विग्रहवाक्यं सलीलं कथयन्ति, तथा कुम्भकारस्य जीवनं न वस्तुतः सरलम् । एतत् कथमिति ज्ञातुं कुम्भकारस्यैव स्वीयैः वाक्यैः तस्य परिचयं प्राप्नुवाम–

''मम जीवनस्य मूलाधारः विशिष्टा काचन मृत् । सा मृत् सर्वत्र नोपलभ्यते । केवलं केषुचन प्रदेशेषु सा उपलभ्यते । अहं तत्र गत्वा भूमिं खनित्वा तां मृदं शकटेन आनयामि । कदाचित् रासभस्य पृष्ठे वाहितेन स्यूतेन अपि आनयामि । तस्यां मृदि जलं मिश्रयित्वा चिक्कणतां प्रापयामि । ततः कुम्भकारचक्रसाहाय्येन कुम्भादिकं करोमि । किन्तु तत् आर्द्रम् । पाकादिकर्मणि तत् उपयोक्तुं न शक्यते । आतपे तत् शोषणीयम् । तावताऽपि कार्यं न समाप्यते । अग्नौ तत् सम्यक् दग्धव्यम् । तदनन्तरम् एव तत् पाककर्मणि उपयोक्तुं शक्यते ।

''कुम्भादिकस्य उपरि कदाचित् अतिसुन्दराणि चित्राणि अपि चित्रयामि । किन्तु तादृशानां कुम्भानां मूल्यम् अधिकं भवति ।

''दिनपूरम् अहं श्राम्यामि । आप्रातः सायङ्कालपर्यन्तं कर्मणि कृतेऽपि मम आयः अल्पः । यतः अद्यत्वे मृदा रचितानि पात्राणि न कोऽपि जनः वाञ्छति । सर्वेषामपि गृहेषु वि-मण्डूरेण अयसा[१] निर्मितानि पात्राणि सन्ति । मृत् - पात्राणि बहुकालं यावत् न

---

१. (=with stainless steel, मण्डूरं=stain, वि-मण्डूरं = stainless)

दृढानि तिष्ठन्ति । मम पिता कुम्भरचनाकलां मह्यम् अशिक्षयत् । मम पित्रे च मम पितामहः । अर्थात् वंशपरम्परया इयं कला मम हस्तमुपगता । परन्तु मम पुत्रः एतां कलां न वाञ्छति । सः आधुनिकशिक्षणं प्राप्य, अधिकधनम् आनयन्तम् उद्योगं प्राप्तुम् अपेक्षते ।''

२१. विपणिः

बहूनाम् आपणानां समुच्चयः यस्मिन् प्रदेशे दृश्यते सः प्रदेशः ''विपणिः'' इति कथ्यते । विपणेः प्रभावः नगरजीवने तथा व्यापकः, अस्ति, यथा विपणिं विना ''नगर''शब्दस्य कोऽप्यर्थो नास्ति ।

विपणौ जनसम्मर्दः साधारणं दृश्यम् । विविधानि वस्तूनि क्रेतुं जनाः अहमहमिकया [१] विपणिं गच्छन्ति । आपणिकाः क्रेतॄन् हसन्मुखाः सन्तः स्वागतीकृत्य क्रेतुं तेषाम् अभीष्टं वस्तु सूचयितुं विज्ञापयन्ति । कदाचित् वस्तुमूल्यम् अधिकम् इति क्रेतारः टिरटिरां कुर्वन्ति । किन्तु आपणिका अतीवचातुर्येण, स्वेषां कष्टम्, अद्यत्वे मूल्यानाम् आधिक्यम्-इत्यादिविषये ''भाषणं'' कुट्टयित्वा, तथा भावनां क्रेतॄणां मनसि उत्पादयन्ति- यथा क्रेतारः आपणिकानां वचन-वैखर्या आकृष्टाः सन्तः, आपणे प्रदर्श्यमानं वस्तु-आवश्यकं वा अनावश्यकं वा इति सम्यगनालोच्य-क्रीणन्ति पश्चात्तापं वहन्ति च ! केषाञ्चित् वस्तूनां क्रयविक्रय-विषये वञ्चनाऽपि सम्भवति ।

---

१. अहं पूर्वम् अहं पूर्वम् इति भावनाकारणात् जायमानया त्वरया ।

प्रथमतः आपणिकाः वस्तूनि क्रीणन्ति । तैः वस्तूनि महता प्रमाणेन युगपत् क्रीयन्ते । तानि च वस्तूनि खण्डशः ग्राहकेभ्यः तैः विक्रीयन्ते । अत्र क्रयापेक्षया विक्रये वस्तूनां मूल्यम् अधिकतरं निर्धार्यते, येन आपणिकानां लाभः सम्भवति ।

नगरजीवनस्य वैविध्यं ज्ञातुम् अस्माभिः विपणिः द्रष्टव्या । विपणौ ये जनाः यानि वस्तूनि विक्रीणन्ति इत्यंशस्य आधारेण तेषां जनानाम् आवश्यकताः, अभिरुचयः, स्वभावाः इत्यादिकं सर्वमपि ज्ञायते । यदि सत्यमुच्यते नगरस्य हृदयं विपणिः ।

विपणौ ये आपणिकाः सन्ति ते सदाऽपि स्वेषां व्यापारैः लाभान्विता एव भवन्तीति वक्तुं न शक्यते । तेषामपि कष्टानि सन्त्येव । किन्तु इतरेषाम् उद्योगानाम् अपेक्षया आपणिकानाम् उद्योगः अधिकतरं धनागमं करोतीति तु सत्यम् ।

२२. आदर्शः नागरकः

प्रायेण नगरवासिनः ये सन्ति ते सर्वे नागरकाः इति कश्चित् अभिप्रायः अस्ति । किन्तु नगरे वसतां सर्वेषाम् अपि नागरकत्वं न सिध्यति । नागरकीभवितुं केचन गुणाः आवश्यकाः ।

प्रथमतः नागरकः स्वस्य राष्ट्रस्य संविधाने चरित्रे तथा महत्त्वे बद्धगौरवः भवेत् । राष्ट्रध्वजं प्रति तस्य मनः सदाऽपि आदरं प्रदर्शयेत् । यस्मिन्नपि कस्मिन्नपि क्षेत्रे सः उद्योगं करोतु नाम; भिन्नेषु क्षेत्रेषु उद्योगं कुर्वाणानां विषये सः सदा मर्यादां प्रदर्शयेत् । देशद्रोहकराणि कर्माणि सः न केवलं कुर्यात्, अपि तु नापि कारयेत्; अथवा तादृशानि कर्माणि कुर्वाणैः सह कदाऽपि सम्पर्कं

न स्थापयेत् । यदा सः कुत्रापि तादृशानि कर्माणि वीक्षेत शीघ्रं सम्बन्धिभ्यः आरक्षकभटेभ्यः सूचयेत् ।

द्वितीयतः, सः सभ्येन शीलेन सर्वत्र सुन्दरं वातावरणं निर्मायात् । नगरस्य सौन्दर्यं मलिनीकर्तुं कदाऽपि न प्रयतेत । विद्यायां सः कृताभिरुचिर्भवेत् । प्रतिदिनं राष्ट्रस्तरे तथा अन्ताराष्ट्रीयस्तरे च सम्भवन्तीः घटनाः जानीयात् । राष्ट्रस्य महत्त्वपूर्णेषु च कार्येषु स्वस्य सहकारं दद्यात् ।

तृतीयतः अन्तिमतश्च ''अहम् एतस्य देशस्य नागरकः अस्मि। एतस्य प्रगत्यै यथाशक्ति कार्याणि सम्पादयामि । कर्तव्यप्रज्ञा मम एकः पुप्फुसः, चिन्तनं मम अन्यः पुप्फुसः । ज्ञानविकासः मम मस्तिष्कं, तथा जीवनस्य उन्नताः आदर्शाः मम हृदयम्–'' एवं रीत्या सः सदाऽपि चिन्तयेत् ।

लिङ्कन् महाशयेन एकदा उक्तं-''तुभ्यं राष्ट्रं किं कृतवत् इति मा चिन्तय । किन्तु राष्ट्राय किं कर्तुं त्वं शक्नोषि इति चिन्तय'' इति । एतत् मम ध्येयवाक्यम् ।

अहं कश्चित् आदर्शः नागरकः भवितुम् इच्छामि ।

२३. भिक्षुकः

अस्माकं देशस्य प्रतिग्रामं प्रतिनगरं भिक्षुकाः सन्ति । तेषां मलिनानि कर्पटवस्त्राणि दृष्ट्वा जुगुप्सा जायते, किन्तु प्रायेण ते हठेन अस्माकं द्वारा किमपि नाणकादिकं प्राप्नुवन्ति एव । केचित् केवलं रोदनस्वरैः अस्मान् आक्रष्टुं प्रयतन्ते । केचित् किञ्चिदिव

बुद्धिमत्तराः । ते गायन्ति । बहूनां भिक्षुकगायकानां कण्ठः मधुरः वर्तते । गानस्य वस्तु अमुकमेव स्यादिति कोऽपि नियमः तेषां नास्ति । केचन भिक्षुकाः चलच्चित्रगीतान्यपि गायन्ति ।

केचन भिक्षुकाः पङ्गवः, अपरे अन्धाः । केषाञ्चन भिक्षुकाणाम् अङ्गेषु अतिशयिता वक्रता अपि दृश्यते । एतेन द्रवीभूतहृदयैः जनैः तेभ्यः किमपि दीयत एव । याननिःस्थानेषु तथा देवालयेषु भिक्षुकाणां पङ्क्तिः अधिका ।

येषां भिक्षुकाणां करपादं समीचीनं तैः कोऽपि उद्योगः करणीय इति निरीक्षा अस्माकं स्वाभाविकी । किन्तु सुशिक्षितानामेव उद्योगप्राप्तिः अद्यत्वे कष्टकरी; एवं स्थिते कः पृच्छति भिक्षुकान्? काश्चन संस्थाः भिक्षावृत्तिनिर्मूलनाय कानिचन योजनानि योजितवत्यः सन्ति । तत्र भिक्षुकाणाम् उद्योगः दीयते, ''जीवने स्वावलम्बनं प्रशस्तम्'' इति तेभ्यः बोध्यते च । किन्तु आलस्यजीवनेन उदरं पूरयन्तो भिक्षुकाः प्रायेण कष्टजीवनं न रोचयन्ते । भिक्षादानं पुण्यमिति भावयन्तो जना अपि न न्यूनाः !

अधुना, प्रासङ्गिकं किञ्चित् । अभिवृद्धानां देशानां तथा अभिवृद्धिशीलानां देशानां मध्ये प्रधानः भेदः नाम आर्थिकी परिस्थितिः । अभिवृद्धेषु देशेषु, उत्पादितानि वस्तूनि कथं विक्रेयाणि इत्येकां समस्यां विहाय आर्थिकदृष्ट्या अन्या समस्या प्रायेण न बाधते ।

किन्तु अभिवृद्धिशीलेषु देशेषु परिस्थितिरतीव भिन्ना । ते देशाः सदा ऋणग्रस्ताः । ऋणं निस्तारयितुं पुनः ऋणं गृह्णन्ति । एवम् ऋणं प्रतिवर्षं वर्धते एव । नानाकारणैः सम्पत्तिं सम्यग्

विभाजयितुं ते असमर्थाः । येन अभिवृद्धिमार्गे शाप इव बृहदाकारा काचन समस्या तेषु देशेषु गोचरीभवति । सा समस्यैव-भिक्षुकसमस्या ।

भिक्षावृत्तिः अस्माकं देशे कदा सम्पूर्णतः नशिष्यति इति सर्वे सुशिक्षिताः सकुतूहलं निरीक्षमाणाः सन्ति ।

२४. जीवने हास्यस्य पात्रम्

हास्यं केवलं कुचोद्याय क्रियमाणः क्षुल्लकः समय-नाशकः प्रसङ्गः इति केचन भावयन्ति । सत्यं तु एतस्य वचनस्य सम्पूर्णतः विरुद्धमस्ति । हास्यं वस्तुतः अस्माभिः हृदये निगूहितानां मर्दितानां च विषयाणाम् उल्लासमार्गेण बहिः स्फोरणार्थं क्रियमाणः समीचीनः यत्नः । विनोदः न कमपि मनुष्यं क्रोधयति । यदि क्रोधयति, सः विनोदो नैव । हास्यस्य प्रतिक्रिया झटिति क्रियमाणं हसनम् ।

यदि सुसङ्गताभिः विनोदकणिकाभिः यं कञ्चन पुरुषं यां काञ्चन स्त्रियं वा वयं हासयितुं शक्नुमः, तदा वयं बाढं धन्यंमन्याः भवामः । किन्तु उत्तमं हास्यं तादृशं स्यात् येन कस्यापि हृदये व्यथायाः कणिकाऽपि न जायेत । हास्यस्य शुद्धं लक्षणम् इदमेव यत् तत् श्रुतवताम् अथवा (पत्रिकादिद्वारा) तत् पठितवतां हृदयं पुष्पम् इव विकासं प्राप्नुयात् । मनसः मलिनता च दूरं गच्छेत् । ''हसत, हृदये विकसत'' इतीयं वाक् हास्यस्य सत्यम् उपयोगं सम्यग् व्यनक्ति । यदि हास्यमयान् प्रसङ्गान् श्रुत्वा जनाः हृदयपूर्वकं हसन्ति, तन्न केवलं हास्यस्य उन्नतं स्तरं द्योतयति, अपि तु हास्यकारस्य हास्यकरणे चातुर्यमपि ।

हास्यकरणं नाम काचित् कला । अभ्यासेनैव सा कला सिध्यति ।

प्रथमश्रेण्याम् एव वर्तमानमपि हास्यम्, अप्रासङ्गिके समये कथ्यमानं किमपि अपेक्षितं फलं न जनयति । हास्यकर्ता न हसेत्, केवलं हास्यश्रोतारः हसेयुः । केषुचन प्रसङ्गेषु इदमपि सम्भवति यत् केवलं हास्यकर्ता हसति, न तु हास्यश्रोतारः !

हास्यप्रसङ्गान् कदाऽपि अ-रोचयमानाः अपि केचन जनाः मनुष्यप्रपञ्चे विद्यन्ते । ते दरिद्रा एव । यतः हास्यं नाम मनुष्यस्य उत्कृष्टा सम्पत्तिः । तया सम्पत्त्या ये न "सम्पन्नाः" ते किं धनिकाः ? हास्यं मनुष्याणां लक्षणं, न पशूनाम् । पशवः न हसन्ति । केवलं मनुष्याः हसित्वा स्वेषां हृदयस्य भारं न्यूनीकर्तुं शक्नुवन्ति ।

२५. प्रयत्नः

केचित् महाशयाः शीघ्रमेव स्व-कृत-कर्मणां फलं प्रतीक्षन्ते । यदि क्षिप्रं फलं न सिध्यति, प्रयत्नमेव ते त्यजन्ति ।

अपरे सन्ति - ये बहुवारं स्वप्रयत्नेषु विफलेषु सत्स्वपि, तितिक्षां न अपनयन्ते । सदाऽपि ते प्रयत्न-सुमुखाः भवन्ति, कदाऽपि प्रयत्नविमुखाः नैव । फलम् अद्य लभ्येत, श्वो लभ्येत, आगामिनि वर्षे वा लभ्येत-तेषां मनसि वैरस्यं लेशतोऽपि न उत्पद्यते । फलं यदि नैव सिद्ध्यति-न सिध्येन्नाम - तावता न काऽपि हानिः किन्तु "श्रमेण हठेन नैरन्तर्येण च अनुष्ठीयमानस्य

कर्मणः फलं मरणानन्तरम् एव यदि लभ्येत- न ततः पूर्वं–लभ्यतां नाम'', ''मम कर्मणः फलम् अन्ये स्वीकुर्युश्चेत् स्वीकुर्वीरन् नाम'' इति निश्चयेन दृढहृदयाः ते कदाऽपि स्वप्रयत्नेषु न विश्राम्यन्ति ।

सप्तसु प्रयत्नेषु वैरिपराजयार्थं प्रयत्नं कृत्वाऽपि तत्र वैफल्यम् अनुभूय पुनः अष्टमवारं प्रयत्नं विधाय जयं लब्धवतो राज्ञः कथा कस्य न ज्ञाता ? विश्वस्मिन् ईदृशा बहवः सन्ति ये स्वेषां प्राथमिकेषु प्रयत्नेषु बहुधा विफलाः सन्तः अपि हठेन पुनः पुनः प्रयतितवन्तः, स्वाभीष्टां सिद्धिं च अविन्दन् ।

सततमुद्यमः अस्माकम् अभीष्टसिद्धेः सोपानम् । सिद्धिदायकत्वेन अस्माभिर्निश्चिते कस्मिंश्चन कर्मणि सश्रद्धं चिन्तनपूर्वकं-विनाऽनावश्यकान् संशयान्- यथाशक्ति सततं निरतता एव ''प्रयत्नः'' इति शब्देन कथ्यते । एतादृशे प्रयत्ने निरतस्य जनस्य दैवम् अपि साहाय्यं विदधाति । तस्मादेवेदं सुष्ठु केनचित् कविना भणितम्–

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत् ॥

२६. रत्नप्रायं वचनम् अथवा सुभाषितम्

जीवनस्य विविधानाम् अनुभवानां तक्ररूपाणां सम्यक् मथनेन गुरूणां मुखतः निःसृतं वाक्य-नवनीतमेव ''सुभाषित'' पदाभिलाप्यम् । संस्कृतसाहित्ये यत्र यत्र दृष्टिः लगति तत्र तत्र

सुभाषितानामेव साम्राज्यं दृश्यते । न केवलं संस्कृते, अपि तु हिब्रू, ग्रीक्, इङ्ग्लीष्, कन्नडम् इन्यादिनीषु सर्वासु भाषासु स्वानुभवानां गद्यरूपेण पद्यरूपेण वा हृदयं बद्धुं समर्थया शैल्या लघुवाक्याकारसम्पादनं दृश्यते । सर्वेषु जीवनप्रसङ्गेषु सम्यक् सूचनादानाय सदा गुरूणां साक्षात् मार्गदर्शनं प्राप्तुं न वयं शक्नुमः । गुरुभिः उच्चारितानां वाक्यमुक्तामणीनां लिपिरूपेण यदि कुत्रापि सङ्ग्रहः प्राप्यते, तदाधारेणैव वयं स्वीयाः समस्याः परिहर्तुं शक्नुमः ।

सुभाषितानि संस्कृते प्रायेण पद्यमयानि वर्तन्ते । अत्र कारणं स्पष्टम् । गद्यापेक्षया पद्यं स्मर्तुं सुलभं भवति । एतस्य वाक्यस्य गद्ये सुभाषितानि नैव सन्तीति न तात्पर्यम् । बाणभट्टस्य कादम्बर्यां गद्ये एव वर्तमाना हृदयङ्गमा वचन-विभूतिः पाठकान् सूक्तिमुक्ताफलैः धनिकान् करोति । किन्तु गद्यमयानि सुभाषितानि विरलानि इति तु वक्तव्यमेव ।

सर्व-ज्ञातानाम् एव अंशानां संयोजनेन सामान्य-वाक्ये रचिते सुभाषितं जायते इति केचन भावयन्ति । किन्तु केवलं तथाकरणेन सुभाषितं न जायते । भाषायां रोचकता, विचारप्रतिपादने कौतुकं वर्धयन्ती समुचित-शब्दसरणिः, सत्यस्य विषयस्य रूपकाद्याभरणैः चाकचिक्यसम्पादनम् इत्यादयो गुणाः सुभाषितस्य वास्तविकं स्वरूपम् ।

प्रसिद्धाः भाषणकाराः, ग्रन्थलेखकाः, पत्रिकासम्पादकाः सर्वेऽपि स्वकीयैः अद्भुतैः सुभाषितैः एव जनप्रियाः सञ्जाताः सन्ति ।

सुभाषितानां सङ्ग्रहकरणम् एव केषाञ्चन अतीवप्रियः विराभ्यासः[१] । तेषाम् उपकारः स्वयं सुभाषितरचनादपि महत्तर इत्यहं मन्ये । यतस्तेषां परिश्रमस्य फलतया एव वयमिदानीं सहस्रशः सुभाषितानि पठित्वा मोदामहे ।

२७. समयः सु-मयः कर्तव्यः

"भविष्यं न यदृच्छया सम्भवति, किन्तु तत् समयस्य सदुपयोगेन निर्माप्यते" इति कश्चन आभाणकोऽस्ति । आम् । समयस्य सु-मयतासम्पादनेन भविष्यं निर्मातुं वयं प्रभवामः ।

समयः अतीव विचित्रं वस्तु । अतीव दीर्घम् अतिह्रस्वम् अत्यन्तं मन्दमतीव शीघ्रतरं च वस्तु यत् किञ्चन विश्वस्मिन् विद्यते तत् समयः एव । कस्मिंश्चित् कर्मणि अत्यन्तं व्यग्रायाः व्यक्तेः समयः ह्रस्वः प्रतिभाति । यां काञ्चन व्यक्तिं यदा वयं प्रतीक्षामहे तदा समयः दीर्घः प्रतिभाति । क्षणाः घण्टायन्ते ।

सर्वस्य कर्मणः उत्पत्तिः समयाधारितः अथवा कालावलम्बितः । वयं कालं स्रष्टुं न समर्थाः नापि ग्रहीतुम् । तथाऽप्येतद् विचित्रं यत् कालः अथवा समयः अस्माकं महद् धनम् । अस्य धनस्य सदुपयोगेन वयं धनिका अपि भवितुं प्रभवामः, अस्य धनस्य अनुपयोगेन दरिद्रा अपि भवितुं शक्नुमः ।

धनं कुत्रापि रक्षितुं साध्यम् । किन्तु समयधनं रक्षितुं न साध्यम् । वर्तमानसमयस्य सदुपयोगो नाम लब्धस्य सम्पदः

---

१. विरामकालिकः अभ्यासः = hobby

अस्माकं ज्ञानाभिवृध्यै व्ययः । तस्मात् एकस्य क्षणस्यापि यथा व्यर्थता न भवति तथाऽस्माभिः किमपि अनुभवात्मकं द्रव्यम् आसादनीयम् ।

''क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्'' इति कश्चन व्याहारोऽस्ति । क्षणस्य योगक्षेमं यदि वयं सम्यक् पर्यवेक्षामहे घण्टा-दिन-वर्षादीनि स्वयमेव स्वेषां योगक्षेमं पर्यवेक्षन्ते । पर्वतारोहणरूपं ध्येयं, सोपानानाम् उपरि क्रमशः क्रमणेन साध्यते। अस्तु नाम जीवने महद् ध्येयं, किन्तु तस्य सिद्धौ एकैकः क्षणोऽपि आदरेण उपयोक्तव्यः । व्यूतानि तृणानि दृढाः रज्जवः भवन्ति । तथैव सार्थकीकृताः क्षणाः एव वर्षावधिकम् अभ्यासं निर्वर्तयन्ति । ''महापुरुषाः'' इति परिगण्यमानाः कथं तावन्तं स्तरम् आरोढुं समर्थाः अभवन्निति गम्भीरं विचार्यमाणे समयं सु-मयं कृत्वा एव ते तादृशाः अभवन्निति ज्ञास्यामः ।

२८. विराभ्यासः

स्वस्य मोदार्थं विरामवेलायां जनैः क्रियमाणः अभ्यासः विराभ्यासः (hobby) । विराभ्यासे एषैव कलाऽभ्यसनीया, एतदेव ज्ञानमभ्यसनीयमिति कोऽपि नियमो नास्ति । किन्तु स्वसन्तोष उत्पद्येत, तथा पर-पीडा नोत्पद्येतेति एक एव नियमोऽत्रास्ति । अन्यथा कोऽपि विरामवेलायां चौर्याभ्यासं शिक्षेत । चौर्येण तस्य स्वसन्तोषो जायते वा न वा, किन्तु तस्याभ्यासस्य समाजे प्रयोगेण परपीडाऽवश्यं जायते । तस्मात् कारणात् चौर्याभ्यासं विराभ्यासानां पट्टिकायां संयोजयितुं न शक्यते ।

विराभ्यासः जीविकायै क्रियमाणेषु उद्योगेषु प्रायो नान्तर्भवति। क्वचिद् विराभ्यासैः अस्माकं धनागमो भवेत् किन्तु तेऽस्माकं सन्तोषार्थं सन्ति न तु केनचिन्निर्बन्धेन ते क्रियन्ते। विरामवेलायां क्रियमाणं सकलमपि कार्यं विराभ्यासो न भवति। यथा अन्येषां जनानां विषये परस्परेण गप्पं(=असत्यकथावार्तालापः,जल्पः) न विराभ्यासः। येनाभ्यासेन प्रमोदार्थं सततं च क्रियमाणेन अस्माकं ज्ञानमभिवर्धते, अस्माकं संस्कृतिश्च प्रशस्तीभवति तादृशोऽभ्यासः विराभ्यासः। यथा चित्रस्य चित्रणम्, उद्यानसंवर्धनं, नाणकसङ्ग्रहणं, प्रेषापत्रसङ्ग्रहणम् (stamp collecting) एतादृशा अभ्यासाः विराभ्यासत्वेन परिगणयितुं शक्याः। विराभ्यासस्य अत्यन्तं प्रशस्तोंऽशो नाम, कस्यापि निर्बन्धं विना यदृच्छया वयं विराभ्यासे संलग्ना भवामः। अत्र पराजयेन अस्मान् कोऽपि नावमन्यते। जयेन तु सर्वत्र संमानना !

विरलानां वस्तूनां सङ्ग्रहणं केषाञ्चन विराभ्यासः। अधुनाऽनुपयुज्यमानानां नाणकानां, पुरातनीनां हस्तप्रतीनां सङ्ग्रहणं कृत्वा ते तद्विषये कुतूहलिभ्यः बोधयितुं शक्नुवन्ति। नैतावदेव, पुरातनं राष्ट्रेतिहासं सम्यग् ज्ञातुमपि तादृशं सङ्ग्रहणं पर्याप्तमात्रया प्रयोजनकारि भवति।

विश्वस्मिन् अत्यन्तं प्रसिद्धानां व्यक्तीनां हस्ताक्षरस्य सङ्ग्रहणं केषाञ्चन विराभ्यासः। केचन स्ववशे प्राचीनानि कार् (=Car) यानानि स्थापयन्ति। मनोहर्या भङ्ग्या पुष्पाणां संयोजनाय केचित् स्पृहयन्ति, तस्मिन्नेव विषये परिणता अपि भवितुम् इच्छन्ति। तदेव तेषां विराभ्यासः। कस्याञ्चन साप्ताहिक्याम् एषा वार्ता

प्रकटिताऽऽसीत् यत् कश्चन महाशयः प्रसिद्धानां पुरुषाणां पादरक्षाः सङ्गृहीतवानस्ति !

एतैः विराभ्यासैः कदाचिद् विज्ञानस्यापि भूयानुपकारो भवति। डार्विन् महाशयस्य जीवोत्पत्ति-तद्विकास-सिद्धान्तस्य प्रकाशनानन्तरं बहूनां यूनां मु.जी.शेषस्य (मुद्रित-जीवावशेषस्य = fossils) सङ्ग्रहणमेव विराभ्यासोऽभवत् । एतेन, तावत् पर्यन्तं तर्कितुमप्यशक्तानां विचित्राणां नानारूपाणां जीवानां प्राचीनकालेऽस्तित्वं प्रति दृढं प्रमाणं लब्धम् ।

अधुना मम मित्रस्य विराभ्यासं प्रति त्रिचतुरा वाचो वच्मि । सः विरामकाले संस्कृतसुभाषितानां सङ्ग्रहं करोति । एतानि सुभाषितानि सः कदाचित् पुस्तकेभ्यः सङ्गृह्णाति, कदाचित् एतानि उद्धरतां जनानां मुखेभ्यः । तानि सुभाषितानि सः कण्ठस्थीकुरुते । एतेन जीवने समीचीनस्य ध्येयस्य रूपणाय प्रशस्तो मार्गो लभ्यते इति सः वदति ।

ममान्यत् मित्रं चित्राणां चित्रणेऽत्यन्तं कुतुकि अस्ति । यद्यपि तस्य कार्यालये महानेव कार्यभारः येन कदाचित् अधिकृतानि पत्रकानि (files) गृहं प्रति तेन नेतव्यानि परिशीलनीयानि च भवन्ति, तस्मात् तस्य विरामोऽल्प एव; तथाऽपि कथञ्चित् समयं लब्ध्वा तावति अल्पावकाशे चित्राणि रचयति । तेन चित्रितानि चित्राणि अद्भुतानि न स्युः, तत्र दोषा अपि दृश्येरन् । किन्तु स्वस्य विराभ्यासेन तेनानुभूयमानः हर्षः किल मुख्यः । विराभ्यासस्य मुख्यं प्रयोजनमपि तदेव - अर्थात् स्वान्तः सुखं स्वान्तसुखं वा; न पुनः परेषां सुखम् ।

अभ्यास इति शब्दस्य अर्थः ह्व्यास इति तद्भवशब्देऽप्यस्ति । त्रिकाण्डशेषाख्ये कोशग्रन्थेऽयं शब्दो लभ्यते । आधुनिकसंस्कृते 'ह्व्यास' इत्येतं शब्दं विराम्यासार्थे स्वीकर्तुं शक्यते ।

२९. चित्रकला

प्रायेण शिशवः चित्रैः आकृष्टाः भवन्ति । पुस्तकानि यदि चित्रपूर्णानि, विद्यार्थिनां प्रमोद एव । बहवः विद्यार्थिनः चित्रप्रियाः ।

केचित् चित्रकलामेव जीविकां कुर्वन्ति । भारते विविधाभिः प्रादेशिक-शैलीभिः साम्प्रदायिकी चित्रकला अभिवृद्धिं गता । तासु शैलीषु मैसूरुशैली प्रसिद्धा ।

भावानाम् अभिव्यञ्जनाय चित्ररचना श्रेष्ठं साधनम् । केषाञ्चन चित्राणां दर्शनेन वयं नूतनम् अलौकिकं विश्वमेव प्रविशामः । केचित् चित्रकाराः अस्माकं परिचितानाम् एव वृक्ष-नदी-गृहादीनां चित्रणे बद्धादराः भवन्ति । अपरे मनुष्याणां चित्रणं रोचयन्ते । अन्ये तु पशुपक्षिणां कीटानां जलजन्तूनां च मनोहरैः चित्रैः अस्मान् मोहयन्ति ।

चित्राणां चित्रणं तपःसाधनरूपेण कठोरेण श्रमेण कुर्वन् कलाकारः सत्यमपि तपस्वी मन्तव्यः ।

३०. क्रीडाः

वयं बाल्ये क्रीडामग्नाः । यौवनेऽपि क्रीडासक्तिः केषाञ्चन जनानाम् अनुवर्तत एव । पशवोऽपि क्रीडाप्रियाः । श्वानः,

बिडालाः, व्याघ्राः, भल्लूकाः गजाः च क्रीडां कुर्वन्तो दृश्यन्ते । विनोदाय पक्षिभिरपि डयनवेलायां कदाचित् नानाविधाः विलासाः क्रियन्ते ।

क्रीडया मानसिकं दैहिकम् - उभयविधमपि आरोग्यं स्थिरीभवति ।

कासुचन क्रीडासु कर-पाद-चलनस्य प्राधान्यं भवति । मल्लक्रीडा कन्दुकक्रीडा इत्यादिन्यः क्रीडाः अत्र उदाहरणम् ।

कासुचन क्रीडासु केवलं मनोविनोदः प्रधानोंऽशः । वराटिकाक्रीडा, चतुरङ्गं च अत्र द्वे उदाहरणे ।

यत्र पणत्वेन धनादिकं न्यस्यते सा क्रीडैव न; परन्तु क्रीडाभासः । अक्षः, कुक्कुटयुद्धम् इत्यादि-चेष्टितानि मानवानां परस्परेण द्वेषम् उत्पादयन्ति । तानि वस्तुतः पीडाः ।

क्रीडास्पर्धाः नानाविधाः जगति वर्तन्ते । तत्र ओलिम्पिक् स्पर्धा अत्यन्तं प्रसिद्धा ।

क्रीडानां चिकित्सामौल्यमपि अस्ति । मानसिकरोगान् शमयितुं क्रीडा प्रशस्तं भेषजं भवतीति वैद्याः कथयन्ति ।

क्रिकेट्, फुट्बाल्, टेन्नीस् इत्यादिक्रीडाः अत्यन्तं जनप्रियाः ।

सर्वेष्वपि राष्ट्रेषु क्रीडाभ्यासिनो जना एव तत्तद्राष्ट्राणां प्रशस्ता सम्पत् ।

३१. आरोग्यभाग्यम्

''आरोग्यमेव सौभाग्य''मिति आभाणकः, सत्स्वपि सम्पत्तिभूयिष्ठेषु विभवेषु - विनाऽऽरोग्यं - तस्य सर्वस्यापि

विफलतां वक्ति । केचन पुरुषाः पैतृकेन दायेन, स्वयं सम्पादितेन च ऐश्वर्येण समुपेताः सन्तोऽपि आरोग्यहीनाः सन्तः स्व-सम्पादितं धनं सम्यगुपयोक्तुं न शक्नुवन्ति । अपरे केचन दरिद्राः सन्ति; किन्तु तेषां सदाऽपि हसन्मुखिता, प्रकाशमयानि चक्षूंषि; त्वरिततरं चलन-वलनं रोगराहित्यमित्यादिकं तेषामारोग्यसम्पदं सूचयति । तेषां अन्यत् लक्षणं नाम, स्वच्छता ।

स्वच्छता एव आरोग्यसूचनस्य प्रथमः स्तरः । ''निर्मलत्वमेव देवत्वप्राप्तौ प्राथमिकं सोपानं'' एवं कश्चिदाभाणकोऽस्मान् जागरयति । येषां स्वच्छता नास्ति, तेषामारोग्यमपि प्रायेण नास्ति। मलिनानां वस्त्राणां धारणं, नित्यं स्नानस्याकरणम्, अशुद्धस्थलेषु भोजनमथवा शयनं, वीथीषु विक्रीयमाणानां भक्ष्यवस्तूनां भक्षणम् इत्यादिकं मनुष्यस्य निर्मलत्वराहित्यं सूचयति। तद्विरुद्धतया प्रतिदिनं स्नानं, शुद्धेषु स्थलेषु भोजनादिकम्, उपयुक्तानां पात्राणां स्वच्छेन जलेन सम्यक् क्षालनं, निर्मलानां वस्त्राणां धारणमित्यादिकं मनुष्यस्य स्वच्छताप्रीतिं द्योतयति ।

द्वितीयः स्तरो नाम पुष्टिकराणां भोज्यवस्तूनां स्वीकारः । कतिचन फलानि, पत्राणि, केचन शाकाश्च अस्माकं देहस्यारोग्यवर्धनानि बहूनि जीवसत्त्वानि बिभ्रति ।

तृतीयः सुप्रसिद्धः स्तरो नाम व्यायामः । व्यायामेन सर्वेष्वङ्गेषु रक्तस्य परिचलनं निराबाधं भवति । भारतीयपद्धत्या व्यायामं केचन रोचयन्ते । एष व्यायामः योगासनमिति नाम्ना ख्यातः । रक्तपरिचलनस्य समीकरणपूर्वकं दीर्घकालिकानां दैहिकानां

मानसिकानां च रोगाणां निवारणमस्याः योगासनपद्धतेर्वैशिष्ट्यमस्ति । पाश्चात्यपद्धत्या व्यायामे कृते अङ्गोपाङ्गानां सुपुष्टता दीर्घश्रम-सहिष्णुता शक्तिश्च प्राप्यन्ते । अद्यत्वे दैहिक-बल संवर्धनाय चीनादेशमूलीयाः कुङ्ग् फू-ऊषू इत्यादिन्यः कलाः; जपान्देशमूलीयाः जुजिट्सु-कराटे-ऐकिडो-निञ्जुट्सु इत्यादिन्यः कलाः; कोरियादेशमूलीयाः टीकोण्डो इत्यादिन्यश्च कलाः जनप्रियाः भवन्त्यः सन्ति । केरलदेशे अतीव सुप्रसिद्धा एतादृशी अन्या कला नाम कळारिप्पयट्टु । यद्यपि एतासां कलानाम् उद्देश्यं न केवलमारोग्यवृद्धिः किन्तु युद्धार्थं युवकेभ्यो युवतिभ्यश्च साम्प्रदायिक्या पद्धत्या शिक्षणदानं; तथाऽपि देहस्य दृढताऽपि एताभिः कलाभिः सम्यगभ्यस्ताभिः सिध्यतीति कृत्वा आधुनिका युवानो युवतयश्च एताभिः कलाभिराकृष्टा भवन्ति ।

आरोग्यस्य चतुर्थः स्तरो नाम मानसिक्याः शान्तेः पालनम् । अर्थात्, हितकरेषु सम्भाषणादिषु मग्नता, व्यर्थजल्पनादीनां त्यागः, असूयादिक्षुद्रस्वभावानां परिवर्जनञ्च । वैज्ञानिकैः संशोधनैः साधितं यत्-अनावश्यकः क्रोधोद्वेगः, मानसिक्यः चिन्ताः, असूया इत्यादयः भावाः हृदयस्य श्रमम् अधिकीकुर्वन्ति, अङ्गोपाङ्गानां पीडां जनयन्ति, क्षेत्रियाणाम् (अ-चिकित्स्यानाम्[१]) अपि व्याधीनाम् उत्पत्तये कारणीभवन्ति च ।

पञ्चमः स्तरः यावच्छक्ति अङ्गोपाङ्ग-चलनवलन-त्यागपूर्वकं ध्यानम् । ध्यानस्य महत्त्वमद्यत्वे अधिकाधिकं ज्ञायमानमस्ति । ध्याने बह्व्यः पद्धतयः सन्ति । अस्माकमनुकूलां कामपि

१. क्षेत्रं नाम शरीरम् । शरीरमेव मौल्यरूपेण स्वीकुर्वन् चिकित्सानर्हो व्याधिः क्षेत्रियो व्याधिः । (इति डा. वीरभद्रमिश्रः)

पद्धतिमाश्रित्य ध्याने कृते शारीरकाः श्रमा दूरीभवन्ति, हृदयस्य विश्रान्तिर्लभ्यते, मानसिकाश्च क्लेशा अपनीयन्ते ।

एतैः पञ्चभिः स्तरैः सम्यगनुष्ठितैः मानवः आरोग्य-भाग्य-सम्पन्नः, समाज-हितकृत् स्वोद्धारकः परोद्धारकश्च भवितुं शक्नोति ।

३२. जनसङ्ख्यावृद्धिः कुटुम्बकल्याणं च

माल्थ्यूस्नामकः कश्चित् चिन्तकः ''प्रतिवर्षं जनसङ्ख्या द्विगुणीभवति, किन्तु आहारोत्पादनं तथा न द्विगुणीभवति; केवलं सङ्ख्यानुक्रमेण वर्धते । तस्मात् कारणात् सङ्ख्यया वर्धमानानां जनानां कृते लप्स्यमानः आहारः न पर्याप्तो भविष्यति । अनेन कारणेन जीवनार्थं स्पर्धा जायते'' इति त्रिशतवर्षपूर्वमेव जनान् जागरितवान् आसीत् । डार्विन्नाम्ना विज्ञानिना उपज्ञाते विकास-सिद्धान्ते दृश्यमानस्य ''अधिक-योग्यः जीवति'' इति वादस्य मूलभूतं प्रतिपादन-युक्ति-बीजं माल्थ्यूस्विचार एव अस्तीति सर्वे जानन्ति । जनसङ्ख्याशास्त्रमिति किञ्चन शास्त्रमेव अद्यत्वे जातमस्ति । तस्मिन् परिणताः पण्डिताः ''यदि जनसङ्ख्यावृद्धिः न नियन्त्र्यते, सा सर्वेषां राष्ट्राणां आर्थिकीः समृद्धीः गिलती''ति जागरणं दत्तवन्तः ।

शिक्षणस्तरदृष्ट्या अत्यन्तं निम्नसोपाने वर्तमानानां भारत-सदृशानां दरिद्राणां देशानां विषये जनसङ्ख्यावृद्धिविषयिणी भीतिः वास्तविकी प्रतिभाति । परम्पराधारितः भारतीयः समाजः बहुभिः मूढ-भावैः ग्रस्तः । अधिकसन्तानो मङ्गलकर इत्येका भावना ।

स्त्रीसन्तानेन लाभो नास्ति, पुंसन्तानेन लाभोऽस्ति; तस्मात्, यावत्सङ्ख्यया अपि स्त्रीशिशवः जायेरन् नाम-पुंशिशूनां जननार्थं प्रतीक्षा कार्या एवेति अपरा भावना । अस्याः भावनायाः कारणात् अष्ट-सन्तान-वन्तः दम्पतयः भारते न विरलाः । अस्माकं साम्प्रदायिकोऽपि आशीर्वादः "अष्टपुत्रवती भव" इत्येवम्प्रकारकः एवास्ति । सावित्रीकथा प्रसिद्धा । सा स्वयं स्त्री भवन्त्यपि शतं पुंशिशवः जायेरन् इति यमं प्रार्थयते!

मूढविश्वासस्तावदास्ताम् – व्यावहारिक्या दृष्ट्या विचार्यमाणे स्ववार्धक्ये स्वसन्तानः स्वपालनं करिष्यति इति पितॄणां प्रत्याशा एव भारते बहु-सन्ततियुक्तानां कुटुम्बानाम् अस्तित्वे हेतुः ।

ऐदंविषयकः चिन्तनक्रमः आधुनिकेषु सुशिक्षितेषु किञ्चिदिव परिवर्तितो दृश्यते ।

प्रथमतः, नगरेषु विद्याभ्यासस्य रूप्यकमौल्यं अधिकं सञ्जातम् । सन्तानानां विद्याभ्यासार्थं क्रियमाणस्य व्ययस्य अपेक्षया, स्ववार्धक्ये स्वसन्तानैः करिष्यमाणं स्वेषां पालनं महत्त्वपूर्णमिति आधुनिकाः दम्पतयः नाङ्गीकुर्वन्ति ।

द्वितीयतः, सर्वेषामपि सुशिक्षितानां जन्मभूमावेव उद्योगः लभ्यत इति वक्तुम्-आधुनिके स्पर्धामये जगति-न शक्यते । स्व-स्थल एव उद्योगे लब्धेऽपि स्थानान्तरणं, अधिकवेतनप्रदात्रे अन्यस्मै उद्योगाय प्रयत्नः इत्यादिकाः प्रसङ्गाः साधारणाः । यत्र यत्र वासार्थं गम्यते तत्र तत्र वसति-सौकर्यं पर्याप्तप्रमाणेन लभ्यत एवेति स्वप्नेऽपि चिन्तयितुं न शक्यम् । लब्धोद्योगैः कदाचित्

एकाकिभिरेव उद्योगप्राप्तिमति देशे उषितव्यं भवति । एवं स्थिते वार्धकभावं भजतां मातापितॄणां पालनं पोषणं सन्तानैः क्रियत एव इति का प्रत्याशा ?

तृतीयतः, विवोढुम् एव अनिच्छन्तः पुरुषाः स्त्रियश्च अधिकतराः सञ्जाताः । दाम्पत्यम् एव जीवनस्य अन्तिमं प्रशस्तञ्च ध्येयम् इत्यङ्गीकर्तुमेते न सिद्धाः ।

एतैः कारणैः जनसङ्ख्यावृद्धौ न्यूनता सम्भवन्ती अस्माभिः द्रष्टुमुचिता । परन्तु भारते अद्यापि तादृशी परिस्थितिर्नास्ति । अत्र किं कारणम् ?

यद्यपि भारतसर्वकारः "कुटुम्बकल्याणविभागः" इति नाम्ना कश्चन विभागम् उद्घाटितवान् अस्ति । तत्र सन्तानम् अनिच्छतां दम्पतीनां शल्यक्रियाद्वारा सन्तानोत्पादकसामर्थ्यं नाश्यते । एतादृश-शल्यक्रियाम् इच्छतां स्त्रीणां पुरुषाणां सङ्ख्या वृद्धिं गच्छन्ती दृश्यते । तथाऽपि चीनादेशे इव अस्मद्देशे सर्वकारः जनान् अस्मिन् विषये न निर्बध्नाति । (चीनादेशे तृतीयं सन्तानं प्राप्तुं कस्यापि अनुमतिर्नास्ति । तृतीयसन्तानाय शिक्षणम् उद्योगः इत्यादिकं किमपि न दीयते) फलस्वरूपेण प्रतिदिनं भारते पञ्चषष्टिसहस्रं (६५०००) शिशवः जायन्ते ।

यस्मिन् कुटुम्बे आयः न वृद्धिं गच्छति, केवलं सन्तानसङ्ख्या वर्धते, तस्मिन् कुटुम्बे सर्वस्य सन्तानस्य शिक्षण-पालनादिकाः विचाराः समस्यामुद्भावयन्ति । देशोऽपि कश्चन कुटुम्ब एव । भारतीयाः प्रजाः सर्वाः इदं सत्यं यथा शीघ्रमवगच्छन्ति तथा भारतस्य कल्याणं साध्यते ।

३३. वरदक्षिणा (यौतुकम्)

विवाहप्रसङ्गे जामात्रे श्वशुरेण दीयमानम् उपायनं यौतुकम् इति शब्देन अभिधीयते । अद्यत्वे कन्नडभाषायाम् अस्मिन्नेव अर्थे वरदक्षिणा इति शब्दः रूढिं प्राप्तोऽस्ति ।

स्वसन्तोषेण श्वशुरः स्वसुता-जामातरौ प्रति उपायनरूपेण यदि किमपि ददाति तत्र आक्षेपणीयं किमपि नास्ति । केषुचन समाजेषु वधूदक्षिणा अपि रूढेति ज्ञायते । तस्मिन्नपि प्रसङ्गे आक्षेप्तुम् अवकाशो न विद्यते । किन्तु अद्यत्वे एषः साम्प्रदायिकः आचारः पैशाचिकतां प्राप्य अट्टहासं कुर्वन् समाजस्य महान् कलङ्कः सञ्जातः इत्येतत् नितरां शोचनीयम् ।

विवाहात् पूर्वं वधूपितॄणां वर-पितॄणां च मध्ये क्रय-विक्रय-व्यवहारेण सदृशः वरदक्षिणा-विषयकः व्यवहारः प्रचलति । इदमत्यन्तं जुगुप्सितम् । यस्मिन् देशे विवाहो नाम पवित्रम् अनुबन्धनं इति साम्प्रदायिकः श्लाघ्यश्च दृष्टिकोणः; तस्मिन्नेव देशे विवाहो नाम विपणौ सम्भवन् कश्चन व्यापारः इत्येवंरीत्या स्वस्य आकृतिं परिवर्तितवान् इतीदं दृष्ट्वा कस्य नाम चिन्तनशीलस्य मनो न दूयेत ?

मानवस्य दुराशायाः सीमैव नास्ति । वरमहाशयस्य पितरौ कन्यापित्रोः द्वारा न्यूनतरम् एकलक्षरूप्यकाणि अपेक्षन्ते । यौ कन्यापितरौ तावद् धनं दातुं न शक्नुतः, तयोः पुत्र्या साकं विवाहः पूर्व-निश्चितोऽपि भग्न इत्येव निश्चयः । वरमहाशयः यथा यथाऽधिकं शिक्षितः भवति, तथा तथा तस्य रूप्यकमौल्यमपि वृद्धिं गमिष्यति । अर्थात् वरः यत्र कुत्रापि कायस्थः तस्य

रूप्यकमौल्यं न्यूनम् । प्रौढशालाशिक्षकस्य अथवा विद्यालयाध्यापकस्य मौल्यम् अधिकतरम् । अभियन्तुः (Engineer) तथा वैद्यस्य मौल्यम् अधिकतमम् । अद्यत्वे च गणकयन्त्रज्ञस्य मौल्यं सर्वतोऽप्युन्नतमिव प्रतीयते!

विचित्रेष्वतिविचित्रतमं नाम कदाचिद् यदि वराः वरदक्षिणां विनैव विवोढुं सिद्धाः भवन्ति, तेन स्वपुत्रीं विवाहयितुं केचन पितरः विकाङ्क्षां (=Hesitation) कुर्वन्ति[१] । तदास्तां नाम-काश्चन कन्या एव तादृशं पतित्वेन वरीतुं न सिद्धाः भवन्ति!

सभ्या इव नाटकं कृत्वा केचन पितरः वरदक्षिणां विना स्वपुत्रान् विवाहयन्ति । किन्तु विवाहानन्तरं वस्तुरूपेण भूरिशः उपायनानि मातृगृहतः आनेतुं स्नुषाः निर्बध्नन्ति! विवाहकाले वरदक्षिणायां दत्तायामपि विवाहानन्तरं पुनरपि धनमपेक्षमाणाः पश्यतोहराः श्वशुराः अपि न विरलाः ।

पूर्वस्मिन् काले बहुविवाहपद्धतिः प्रचलिताऽऽसीत् । सा मूढविश्वासप्रेरिता इत्यत्र न कोऽपि संशयः । पुं-सन्तानः यदि पत्न्यां न लभ्यते स्म, अन्यस्मै विवाहाय पतिः प्रयतते स्म! कदाचित् पत्नी एव अस्मिन् विषये पतिम् अङ्गीकारयति स्म! पुंशिशव एव प्रशस्ता इति मूढभावनया तादृशाः प्रसङ्गा अजायन्त । आधुनिके समाजे त्वन्यः अतिरेकः क्वचिद् दृश्यते । विवाहम् आत्मना कृत्वाऽपि, अन्यत्र कुत्रापि अधिका वरदक्षिणा लभ्यत

---

१. अस्मिन्नर्थे 'पश्चात्पदं' इति शब्दः आधुनिकसंस्कृते लब्धप्रचारः । ''विकाङ्क्षा''शब्दः रामायणेऽस्ति । (सुं. ३७-३८)

इति ज्ञायमाने, प्रथमपत्नीं त्यक्त्वा पुनरपि विवाहार्थं प्रयतमानानां सुशिक्षितानां "सभ्यं" (?) वर्तनम्!

पर्याप्तमात्रया वरदक्षिणाम् अयच्छतोः पित्रोः पुत्र्यां (स्वस्नुषायाम्) अतिक्रूराः हिंसाप्रयोगाः, हत्या च इत्येषः अन्यः आधुनिकसमाजस्य रोगः । सुशिक्षिताः सन्तोऽपि कथं तादृशं वर्तनमेते समर्थयन्ते इति न विद्मः । कदाचित् साक्ष्याणाम् अभावाद् अपराधिनः दण्डलेशविहीनाः सगर्वं समाजे व्यवहारान् पूर्ववत् अनुतिष्ठन्ति ।

वरदक्षिणानाम्न्याः पिशाचिकायाः उच्चाटनार्थं काश्चन सूचनाः दातुमहमिच्छामि ।

१. वरदक्षिणा-सम्बन्धे या हिंसाऽथवा हत्या, तत्र कारणीभूतानां श्वशुरकुटुम्बीयानां मरणदण्डो विधेयः ।

२. महिलानां सर्वासाम् उद्योगप्राप्तिः भवेत् ।

३. "विवाहः एव प्रशस्तः" इति मूढा बालिशा च भावना अपनेतव्या । विवाहो भवेद् वा न वा; स्वक्षेत्रतः समाजाय किमपि योगदानस्य दानमेव जीवनस्य उत्कृष्टः आदर्श इति श्रद्धा जागृयात् ।

४. वरदक्षिणां समर्थयमानानां सर्वेषामपि सामाजिको बहिष्कारः करणीयः ।

५. "किमर्थकः मम विवाहः" इति सुगम्भीरं चिन्तनम् अकृत्वा कोऽपि, अथवा काऽपि विवाहं न कुर्वीत । सनिर्बन्धं यौ पितरौ स्वसन्तानं विवाहयन्ति, तौ विरुध्य अभियोगं कर्तुम्

अवकाशः स्यात् । अपि च सनिर्बन्धो विवाहः अ-वैधः (अधिकृत-विधि-हीनः) इति घोषयितुमपि अवकाशः स्यात् ।

६. विवाहविच्छेदनविषये या विकाङ्क्षा (=Hesitation) समाजेऽधुना दृश्यते, सा निवारणीया ।

३४. परिसरमालिन्यम्

जैविकानाम् अजैविकानां वा वस्तूनां प्रभावोत्पादिकाः शक्तयः परिस्थितयो वा परिसरशब्देनोच्यन्ते । मनुष्यस्य परिसरो नाम उष्णोत्पादिकाः ऊर्जाः, अपरे मनुष्याः, वातावरणम् इत्यादीत्यादि । सस्यस्य परिसरः - मृत्, सूर्यकिरणः, पशवः इत्यादीत्यादि । तथैव समुद्रजीविनां परिसरः - प्राधान्येन समुद्रः, स्ववसतेः उष्णदृष्ट्या तथा जल-भारदृष्ट्या वासार्हता इत्यादीत्यादि ।

परिसरमालिन्यमिति शब्दः, परिसरम् अशुद्धीकुर्वन्तीः सर्वाः अपि रीतीः सूचयति । मनुष्याः धूमैः तथा यान-निःसृतैरनिलैः वायुं सङ्करीकृत्य मलिनीकुर्वन्ति, रासायनिकद्रव्यैर्जलं विषमयीकुर्वन्ति; कृतकैः उद्वल्यैः (=manures) मृदः सस्यपोषणक्षमतां नाशयन्ति च । न केवलं एतैरेव विधानैः, किन्तु अन्यैरपि मार्गैः– ''प्रगति'' नाम्ना परिसरस्य स्वाभाविकं समतोलनं ते छिद्रीकुर्वन्ति ।

परिसरस्य समतोलनमधिकृत्यापि कश्चित् प्रघट्टकः अत्रावश्यकः प्रतिभाति । सजीवं किमपि वस्तु अन्यस्य तथाविधस्यैव वस्तुनः साहाय्यं विना जीवितुं न शक्नोति । गृह्यतामुदाहरणार्थम् आहार-शृङ्खला । सौरकिरणाः प्राथमिकाहारम्

उत्पादयताम् उद्भिज्जानां कृते आवश्यकीम् ऊर्जां यच्छन्ति । तान् उद्भिज्जान् मूषिका, हरिणा वा भक्षयन्ति । तान् पशून् गृध्राः, सिंहाः वा भक्षयन्ति । यदा ते म्रियन्ते-सूक्ष्मा अणुजीविनः तेषां देहगतानि अङ्गानि विश्लिष्य सूक्ष्माणि वस्तूनि कुर्वन्ति । तानि सूक्ष्मवस्तूनि मृदि स्वयं मिश्रीभवन्ति । तानि यदा सस्यैः उपयुज्यन्ते तदा पुनः आहारशृङ्खलाया आरम्भो भवति । इदमेव परिसरीयं समतोलनम् ।

यदि मूषिकाणां सङ्ख्या अत्यन्तं वृद्धिं गमिष्यति, तासां सर्वासाम् आहारस्य प्रदाने पर्याप्तसङ्ख्यया सस्यानां यदि च अभावः, तदा ताः म्रियन्ते-तदाश्रिताश्च गृध्रादयः । अर्थात् परिसरस्य समतोलने केचन व्यत्यासाः प्रकृत्या एव यदा कदा क्रियन्ते ।

किन्तु प्रकृत्या यदा कदा वा जायमानमसमतोलनं न तावतीं भीतिम् उत्पादयति, यावतीं—मनुष्यैः क्रियमाणम् । तथा हि अद्यत्वे निर्माणिकागाराणां स्थापनार्थं बह्वी भूमिरपेक्ष्यते-यदर्थमरण्यानि नाश्यन्ते । अरण्यनाशे तदवलम्बिजीवनाशः स्वाभाविकः । केचन विशिष्टजातीयाः गृध्राः, हरिणाः, शृगालाः, व्याघ्राः, नक्राः, घूकाः भल्लूकाश्च नाशमुपगताः । उद्रः (otter) अतीव विरलः सञ्जातः । गजानामपि जीवितस्थितिर्न तृप्तिकरी ।

तदास्तां नाम, अरण्यानि विना मनुष्याणामेव जीवनम् आतङ्कबहुलं भवति । सामुद्रात् जलात् सङ्घशः उत्पद्यमानाः मेघाः अरण्यकारणादेव शीतीभूय पुनर्जलात्मना परिणताः सन्तो वर्षन्ति । एतान्यरण्यानि यदि न स्युः मेघानां शीतीभवनाय नावसरः,

वृष्टेरपि नावसरः । कार्-यानानां निर्माणिकागारैः उत्पद्यमानो मलिनो वायुः भूमिं परितो वर्तमानस्य ओजोन्मण्डलस्योपरि दुष्परिणामं कुर्वन् ज्ञातः । ओजोन्मण्डलं नाम, सूर्यात् आगच्छतां हानिकराणां किरणानां निवारणेन जीवरक्षाकरं वायुगोलम् । तदधुना यत्र तत्र श्यानं (=slim) सञ्जातम् । केषुचन प्रदेशेषु सम्पूर्णतो नष्टम् । अस्य फलत्वेन भूमिं प्रति सर्वेऽपि सौरकिरणाः विनाऽन्तरायमायान्ति । एतेन परिणामद्वयं जायते । प्रथमतो भूमेरुष्णम् अधिकीभवति । द्वितीयतः केषाञ्चन सौरकिरणानाम् अर्बुद-रोग-जनन-शक्ति-युक्तत्वात् जनेषु अर्बुदरोगः अधिक-मात्रया उत्पद्यते ।

जनसङ्ख्यावर्धनस्य कथमपि नियन्त्रणा, अरण्यनाशस्य शीघ्रशीघ्रं निवारणं, निर्माणिकागारैः सृज्यमानानां व्यर्थवस्तूनां यत्रापि कुत्रापि प्रक्षेपणं निरोद्धुं क्रमाः, प्लास्टिक्-जन्यवस्तूनां मृदः उपरि प्रक्षेपणस्य निषेधः -इत्यादिभिः दृढैः पदैः परिसरस्य शुद्धिः अस्माभिरासादनीया । ''प्रगति'' नाम्ना क्रियमाणं परिसरमालिन्यं मनुष्यस्य अस्तित्वमेव कम्प्र-कम्प्रं करोतीति यथाऽऽधुनिको मानवो जानाति; तथा तस्यैव कल्याणम् ॥

३५. सङ्गणकयन्त्रम्

वस्तुज्ञानस्य (information) सञ्चायकं, दायकं निर्वाहकम् उत्पादकं च किञ्चित् स्वतश्चलि उपकरणम् एव 'कम्प्यूटर्' । (इङ्गलीष् भाषायाम्) अद्यत्वे सङ्गणकम् इति शब्देन यन्त्रमिदम् अभिधीयते । किन्तु अनेन यन्त्रेण न केवलम् अङ्कानां गणना क्रियते, अपि तु विप्रकीर्णानां बहूनां कार्याणां क्षिप्रं निर्वाहः क्रियते ।

पूर्वस्मिन् काले सर्वमपि कार्यजातं मनुष्यस्य करपादद्वारा निरुह्यते स्म । किन्तु अद्यत्वे कार्यजातस्य भूयान् भागः यन्त्रद्वारा कार्यते । अस्यां दिशि सङ्गणकयन्त्रस्य शोध-निर्माणं महत्त्वपूर्णं दैत्यपदम् ।

गणकयन्त्रं यदा ऐदंप्राथम्येन शोधितं, तदा केवलम् अङ्कगणनां कर्तुं तस्य उपयोगः समभवत् । अद्यत्वे तु न तथा । ज्ञान-विज्ञान-मनोरञ्जनात्मकान् त्रीनपि कोणान् गणकयन्त्रं तथा व्याप्नुवदस्ति, यथा गणकयन्त्रं विना मनुष्यस्य विचारवर्धनमेव अनूह्यं प्रतिभाति ।

सागरान्तः वर्तमानानां जीवानां स्वरूपं विश्लिष्य दर्शयितुं गणकयन्त्रं शक्नोति । नयनस्य सर्वाण्यपि अङ्गानि-तेषां दोषप्रदर्शनपूर्वकं प्रदर्श्य नेत्रवैद्यानां बहुधा उपकरोति । बाह्याकाशस्य समग्रं चित्रणं गणकयन्त्रद्वारैव प्राप्यते । न केवलमेतावदेव - शिक्षणक्षेत्रेऽपि गणकयन्त्रं महान्ति अद्भुतान्येव साधितवत् । प्रगतेषु राष्ट्रेषु भाषायाः विज्ञानस्य च गणकयन्त्रद्वारा बोधनं साधारणो वृत्तान्तः । अद्यत्वे पत्रिकोद्यमस्य द्वितीयं हृदयमिव संवृत्तं गणकयन्त्रम् ।

अस्माकं याः भाषाः सन्ति, ताः गणकयन्त्रं न जानाति; तस्मात् तत्कृते काचित् भिन्ना भाषा अन्विष्टा इत्येवं वार्ता पुरातनी । आधुनिकी वार्ता तु-मनुष्यस्य भाषामेव यन्त्रमेतत् यथा जानाति तथा कर्तुं कूतूहलकराः प्रयत्नाः कृताः । विविधभाषाणां माध्यमेन सम्भाषणमपि कर्तुं गणकयन्त्रं शीघ्रमेव शक्ष्यति इत्यपि विज्ञानिनाम् आशा ।

गणकयन्त्रस्य आविष्कारेण–ऊहितुमपि यथा न शक्यते तथा–मुद्रणविधानं त्वरिततरं सञ्जातम् । ''डाटाबेस्'' (data base) विधानेन-मुद्रणं नाम केवलं बालक्रीडा सम्पन्ना । पूर्वं यस्य ग्रन्थस्य मुद्रणार्थं वर्षद्वयमावश्यकमासीत् स ग्रन्थोऽद्य पञ्चदशदिवसावधौ मुद्राप्यते! आधुनिकाः केचन साहितीकाराः पत्राणामुपरि न लिखन्ति किन्तु डाटाबेस् विधानेन स्वग्रन्थान् स्वयमेव मुद्रयन्ते! कलाप्रपञ्चेऽपि गणकयन्त्रस्यैव साम्राज्यम् । केचन चित्रकलाविदः सङ्गीतज्ञाश्च स्वेषां परिणतेः उन्नतान् अवसरान् स्रष्टुं गणकयन्त्रमवलम्बन्ते । प्रत्यग्रा वार्ता–भविष्यं कथयन्तोऽपि गणकयन्त्रसाहाय्येन भविष्यं सूचयन्ति!

एतेन गणकयन्त्रं भूलोके स्वर्गमेव सृजतीति न कोऽपि भ्राम्येत् । गणकयन्त्रे सम्भवन् अल्पतमोऽपि दोषः महतीं हानिमुत्पादयति । अत्र गणकयन्त्रनिर्वाहको जन एव अपराध्यति । केभ्यश्चन वर्षेभ्यः पूर्वं परीक्षायाम् उत्तमां श्रेणीं निरीक्षितवान् कश्चिद् विद्यार्थी गणकयन्त्रस्य दोषकारणतः आत्मानम् अनुत्तीर्णं मत्वा आत्महत्यामेव अकुरुतेति पत्रिकासु प्रकटितमासीत् । परन्तु अन्यं गणयितुं प्रवृत्तो गणकयन्त्रनिर्वाहको यदि प्रमादादन्यं गणयति तदा एवं भवति । किञ्च, शतम् उद्योगिनः यस्यां निर्माणिकायां कार्यं निर्वहन्ति तस्यां केवलम् एकेन यन्त्रेण सर्वं चेत् साध्यते, सम्बद्धाः अधिकारिणः कदाचित् तान् उद्योगिनः उद्योगात् निष्कासयन्ति । एतेन निरुद्योगसमस्या वर्धते । न केवलमेतावदेव–गणकयन्त्रस्य प्रभावः तथा व्यापकीभूतः यथा तद्विज्ञानस्य विषये उदासीनाः पदवीधरा विद्यार्थिनः, सत्यपि तेषां बुद्धिमत्त्वे–उद्योगं प्राप्तुं न शक्नुवन्ति । आधुनिके स्पर्धामये जगति गणकयन्त्ररहितं ज्ञानसाधनम् ऊहितुमपि कष्टम् ।

किन्तु सत्स्वपि गणकयन्त्रनिर्वाहकानां प्रमादैर्जायमानेषु प्रासङ्गिकेषु दोषेषु—मनुष्यस्य भविष्यन्ती प्रगतिः एतद् यन्त्रमेवावलम्बत इत्यत्र न काऽपि संशयकणिका। प्राथमिकस्तरे जायमाना पूर्वोक्ता दोषाः क्रमेण अदृश्या भवन्तीति विज्ञानिनः अभ्यूहन्ते।

३६. समूहमाध्यमानि

विश्वस्य परिवर्तमानानां घटनानां विषये यथासम्भवं त्वरिततरं जनेभ्यः ज्ञापयत् साधनमेव समूहमाध्यमम्। राष्ट्रं, राजकीयाः परिस्थितयः, विज्ञानसंशोधनम्, आर्थिकम् उच्चावचत्वम्, आरोग्यम् इत्यादिविषये जनान् एतत् साधनं बोधयति। सत्यावश्यकत्वे, अन्याय्यमयीः घटनाः विरुध्य जागरयति च।

आधुनिके जगति समूहमाध्यमं प्राधान्येन चतुर्विधम् :- (१) दैनिक्यः पत्रिकाः, (२) नियतकालिक्यः पत्रिकाः (३) आकाशवाणी (४) दूरदर्शनं चेति।

अन्य-समूह-माध्यमापेक्षया वार्ताप्रकाशनाय अधिकस्थलं बिभ्राणम् माध्यमं दैनिकी पत्रिका। वार्तायाः समीक्षणार्थं विमर्शार्थञ्च दैनिकीषु पत्रिकासु पर्याप्तमात्रयाऽवसरो लभ्यते। जनाः स्वाभीष्टाः वार्ताः त्यक्तुमपि शक्नुवन्ति। वार्तापत्रिकासु अन्यदपि आनुकूल्यं वर्तते यत् स्वानुकूले समये स्थले च वार्ताः पठितुं जनाः शक्नुवन्ति। यदि सत्यमुच्यते दैनिकीषु पत्रिकासु वर्तमानानि कतिचन आनुकूल्यानि अन्य-समूहमाध्यमेषु न लभ्यन्ते।

नियतकालिकीषु रोचकशैल्या राजकीयवार्तानां विश्लेषणं प्राप्यते। यद्यपि काश्चन नियतकालिक्यः साहित्यप्रधानास्तथाऽपि

तत्र प्रकाश्यमानेषु सम्पादकीयलेखेषु निशितया शैल्या घटनानाम् अथवा तत्र कारणीभूतानां व्यक्तीनां गुण-दोषौ विचार्येते । काश्चन नियतकालिक्यः केवलं वार्ताप्रधाना एव । ''द वीक्'' ''इण्डिया टुडे'' इत्यादिन्यः पत्रिकाः अत्र उदाहरणम् ।

आकाशवाण्यां वार्तायाः प्रसारे, पूर्वोक्त-माध्यम-द्वयेन असाधनीयं किञ्चित् सौलभ्यमस्ति । आकाशवाण्यां वार्तां पठन्ती व्यक्तिः यदा तदा तत्तत्काले आगच्छन्तीः वार्ताः तत्तत्काले एव श्रोतॄन् नाययति । अत्यन्तं महत्त्वपूर्णत्वेन भासमानानां वार्तानां प्रसारार्थं दैनन्दिनान् कार्यक्रमानपि स्थगयितुम् आकाशवाणी शक्नोति । उदाहरणार्थं राष्ट्रीयस्य निर्वाचन-परिणामस्य त्वरिततरं ज्ञापनाय सङ्गीतादिकार्यक्रमान् सर्वानपि स्थगयितुमाकाशवाणी शक्नोति । किन्तु एकमेव दौर्बल्यमाकाशवाण्यां यदस्माकमभीष्टाः वार्ताः वृत्वा श्रोतुं तत्रावकाशो न लभ्यते । अपि च अत्यन्तं विस्तृतेन रूपेण वार्तां ज्ञापयितुमपि न तत्र शक्यते । सीमिते कालावधौ केचनैव विषया ज्ञापनीया भवन्ति ।

आकाशवाण्या असाध्यं कञ्चन गुणं दूरदर्शने क्रियमाणः वार्ताप्रसारः साधयति । स गुणो नाम, घटनानां साक्षात् प्रदर्शनम् । वार्तापठनदृष्ट्या आकाशवाण्यास्तथा दूरदर्शनस्य च मध्ये न किमपि अन्तरम् । किन्तु घटनाः सम्यग् ज्ञातुं दूरदर्शन-वीक्षकाः प्रभवन्ति । यदि घटनाः नीरसाः अ-महत्त्वपूर्णाश्च, दूरदर्शनस्य वार्ताः वीक्षकाणां हृदयाकर्षणे पराजयन्ते ।

समूहमाध्यमानां मुख्यं कर्तव्यं नाम जागतिकीनां घटनानां सत्यस्वरूपस्य क्षिप्रक्षिप्रं जनेभ्यः परिचायनम् । निर्वाचनसमयेषु

कस्य सर्वकारस्य शासनं देशकल्याणाय प्रभवतीति स्पष्टं चित्रणं प्राप्तुं जनाः उत्कटा भवन्ति । तादृशेषु प्रसङ्गेषु राजकीयविषयिकाः परिचर्चाः समूहमाध्यमेषु स्थानं प्राप्नुवन्ति । कदाचित् स्पशवार्ताः (investigative reporting) समूहमाध्यमैः प्रकाशनीया भवन्ति । समाजकण्टकैः आचर्यमाणाः दुष्टक्रियाः समूहमाध्यमद्वारैव सर्वत्र विज्ञाता भवन्ति । कदाचित् सर्वकारा एव अन्याय्यमाचरन्ति, अन्याय्यकारिभ्यो रक्षणं च यच्छन्ति । तादृशेषु प्रसङ्गेषु समूहमाध्यमस्य कर्तव्यभारो महान् ।

सर्वे जना नीतिमन्त इति वक्तुं न शक्यते । जनैः स्वयं सृज्यमानाः सामाजिक्योऽपि बह्व्यः पीडाः जनान् बाधन्त एव । ताः पीडाः निवारयितुमपि समूहमाध्यमानि प्रयतेरन् । उदाहरणार्थम् उत्कोचः, वरदक्षिणा इत्यादीत्यादि । अर्थात् समाजहितसाधकानाम् अभिप्रायाणां सृजनमपि समूहमाध्यमस्य ध्येयेष्वन्तर्भवति ।

एतैः कर्तव्यभारैः समुपेतत्वात् समूहमाध्यमे कार्यं निर्वहन्तः उद्योगिनः सदा उन्नतविचारपूर्णान्तःकरणाः भवेयुः । यदि त एव प्रशस्ताः रीतीः त्यक्त्वा वक्रं पन्थानमाश्रयन्ते; तदा समूहमाध्यमस्य दुरुपयोगो भवति, समाजोपरि च अनभीष्टः क्षुद्रः प्रभावो जायते ।

'कस्मिन्नपि प्रशासने पक्षपातम् अकृत्वा, समाजस्य कल्याणमेव चिन्तयन्ति समूहमाध्यमानि आधुनिकविश्वस्य जीवनाड्यः' इत्युक्ते अतिशयोक्तिर्न स्यात् ।

३७. दूरदर्शनम्

कश्चन कालः आसीद् यत्र दूरदर्शनं दृष्ट्वा रोमाञ्चनं विस्मयातिरेकश्च भवतः स्म । परन्तु अद्यत्वे जानुचङ्क्रमणं कुर्वतः (ಅಂಬೆಗಾಲಿಡುವ) शिशोः अपि प्रायेण दूरदर्शनं न विस्मयं करोति । यतः नगरे नगरे, ग्रामे ग्रामे, गृहे गृहे च सर्वत्र दूरदर्शनं गोचरीभवति ।

दूरदर्शने मनुष्याणां यत् चलनवलनं स्पष्टं दृश्यते तत् प्रमुखम् आकर्षणम् । दूरदर्शनस्य पुरस्तात् आकाशवाणी नीरसा इव प्रतिभाति । यतः 'सर्वेन्द्रियाणां नयनं प्रधानम्' इत्याभाणकानुसारेण विश्वज्ञानं नेत्रेण यथा जायते तथा नान्येन इन्द्रियेण । वर्णमयानि चलनयुक्तानि बिम्बानि दूरदर्शनस्य जीवातुः । (=ಜೀವಾಳ)

दूरदर्शनं किञ्चिदद्भुतं यन्त्रम् । समग्रं ब्रह्माण्डं तत्र अस्माकं चक्षुषोः अग्र एव स्फुरति । दूरदर्शनं यदि अस्माकं गृहे अस्ति– सकलं विश्वं गृहगतं भवति! धारावाहिन्यः कथाः, नृत्यानि, नाटकानि, पशु-पक्षि-कीटादीनां जीवनवैविध्यं, विश्वस्य प्रमुखाः घटनाः, राजकीयानां व्यक्तीनां (सर्वदेशीयानां) भाषणानि, चलच्चित्राणि, पर्वसु (=ಹಬ್ಬಗಳಲ್ಲಿ) सांस्कृतिकाः उत्सवाः, एतत्सर्वं अस्मिन् ऐन्द्रजालिक-पेटिकायां (मायादर्पणे वा!) स्पष्टम् अवलोक्यते, श्रूयते च ।

दूरदर्शनस्य प्रसारवाहिनीनां (Channels) स्थापना भारते तथा त्वरितं कृता यथा आकाशवाण्याः केन्द्राणां स्थापना कदाऽपि नाभवत् । पूर्वं पर्याप्त-धनसम्पत्ति-हीनाः रेडियोयन्त्रं क्रेतुं विकाङ्क्षां

(Hesitation) कुर्वन्ति स्म । परन्तु अधुना– दरिद्रा अपि ऋणं कृत्वा दूरदर्शनं क्रेतुं वाञ्छन्ति! एवमस्ति दूरदर्शनस्य महिमा!!

भारते यदा दूरदर्शनं प्रथमवारम् आगतं, तदा तत् वर्णमयं नासीत् । प्रायशः एतस्मादेव कारणादिति मन्ये– प्रारम्भे दूरदर्शनं न अत्यन्तं जनप्रियम् आसीत् । परन्तु यदा वर्णिलं दूरदर्शनं सर्वत्र देशे दर्शनसुलभं सञ्जातं– तदा न केवलं दूरदर्शनस्य भाग्यद्वारम् उद्घाटितम्; परन्तु तत्रत्यानां तन्त्रज्ञानां, धारावाहिनीषु कथासु पात्रं स्वीकुर्वाणानां नट-नटीनां कार्यक्रमनिर्वाहकानाञ्च! चलच्चित्रेषु अभिनयेन प्रसिद्धाः नटनटयः पूर्वं दूरदर्शनकार्यक्रमेष्वभिनेतुं विकाङ्क्षां कुर्वन्ति स्म । अधुना तादृशी परिस्थितिर्नास्ति । प्रसिद्धाः चलच्चित्रताराः अपि दूरदर्शनस्य धारावाहिनीषु कथासु अवसरः लभतामिति आशां कुर्वन्ति!

केवलं पञ्चवर्षेभ्यः पूर्वं दूरदर्शनमिति शब्दो मम कुतूहलवर्धनः कोऽपि भावः आसीत् । अधुना? दूरदर्शनरहितं जीवनम् ऊहितुमपि मम अशक्यम्!

दूरदर्शने ये कार्यं कुर्वन्ति, नृत्य-नाटक-कथादिष्वभिनयं कुर्वन्ति, कार्यक्रमनिर्वाहं च कुर्वन्ति–तेभ्यः सर्वेभ्यः समस्ताऽपि नागरिकी जनता कृतज्ञाऽस्ति । विशिष्य तेभ्यः– ये दूरदर्शनयन्त्रं निर्मान्ति ।

३८. आधुनिकसमाजस्योपरि चलच्चित्रस्य प्रभावः

चलच्चित्रं प्रति जिगमिषा यूनाम् अधुना विरामकालिकः अभ्यास एव संवृत्तः । चलच्चित्रदर्शनाभिलाषः तथारीतिकः

सम्भवन्नस्ति यथा विद्यालयस्य पाठप्रवचनादिकमपि त्यक्त्वा विद्यार्थिनः चलच्चित्रमन्दिराणि गच्छन्ति । केवलं चलच्चित्रस्य दर्शनं न कमपि युवानं भ्रंशयति, किन्तु दुष्टानां भावानाम् उद्वेल्लनेन (glorification) यूनः आकर्षन्ति चलच्चित्राणि, नूनम् आधुनिकविद्यार्थिनां मानसं दुष्परिणामपूरितं कुर्वन्तीत्युक्ते नात्रातिशयोक्तिः ।

शिक्षणतज्ज्ञाः अधुना ज्ञातवन्तो यत्सामाजिकानां केषाञ्चन व्यसनानां वर्धने निम्नस्तरीयाणि चलच्चित्राणि महत्त्वपूर्णं पात्रमावहन्तीति । कांश्चन अपवादांस्त्यक्त्वा, भारतीयभाषासु अद्यत्वे निर्मीयमाणानि चलच्चित्राणि प्रायेण जनजीवनस्य वास्तविक्याः परिस्थितेः सुदूराणि । तत्र प्रिय-प्रेयस्यौ उद्यानेषु परस्परं हस्तं गृहीत्वा असम्बद्धं नृत्यन्ति । कदाचिद् वीथीष्वपि तयोः नृत्यकार्यक्रमः प्रचलति । चलच्चित्रेषु प्रदर्श्यमानानि कथावस्तूनि अतितमां हास्यास्पदम् । सत्यदूराणि उद्रेककराणि वस्तून्येव अविद्यावतो ग्रामीणान् तथा विद्यार्थिनश्च आकर्षतीति ज्ञात्वा चलच्चित्रनिर्देशकाः तादृशान्येव वस्तूनि प्रदर्शयन्ति ।

मया सप्ताहात् पूर्वं किञ्चित् चलच्चित्रं दृष्टम् । कथावस्तु एवमस्ति :- कश्चिद् बुद्धिमान् विद्यार्थी, सः दरिद्रः । तस्मिन् काचिद् विद्यार्थिनी प्रीणाति । तयोः विवाहं कन्यापितरौ नाङ्गीकुर्वाते । तत्र कारणं स्पष्टं - कन्यापितरौ धनिकौ । किन्तु कानिचन "अद्भुतानि" भवन्ति, येन सोऽपि विद्यार्थी धनिको भवति । तदनन्तरं प्रियप्रेयस्योः विवाहः प्रचलति । "दरिद्रः" विद्यार्थी सदाऽपि तैलगे द्विचक्रे (motorbyke) गतागतं करोति । तस्य गृहे दूरदर्शनमपि अस्ति । स किल दरिद्रः! यदा

सः विवाहात् प्राक् प्रेयस्या साकं 'चलच्चित्रनाट्यं' करोति तदा तस्य शरीरोपरि अत्यन्तमेव महार्घाणि वस्त्राणि सन्ति!

चलच्चित्रेषु क्वचिदभिनयोऽपि कृतकः । पात्रधारिणो यदा हसन्ति तदा अस्माभिः रुदितव्यं भवति । तैः रुदिते अस्माभिः हसितव्यं भवति! केषाञ्चन चलच्चित्राणां कथाप्रकरणानि ईदृशानि सन्ति यत् तस्य समाप्तावपि कथायाः शिरोऽपि न बुध्यते लाङ्गूलमपि न ज्ञायते!

कतिचन विरलानि चलच्चित्राणि संस्कृतिदृष्ट्या वस्तूनां प्रदर्शनदृष्ट्या च अत्यन्तम् उन्नतस्तरीयाणि । दुरदृष्टवशात् तादृशानि चलच्चित्राणि अधिकसङ्ख्यया जनानाम् आकर्षणे विफलानि भवन्ति । तस्मात् कारणात् प्रशस्तानि वस्तूनि ग्रहीतुं चलच्चित्रनिर्देशकाः प्रायेण विकाङ्क्षां (Hesitation) कुर्वन्ति ।

अत्रान्यत् अत्यन्तं जुगुप्सास्पदं नाम चलच्चित्रेषु प्रदर्श्यमानं हिंसा-क्रौर्यादिकं युवानः अनुकर्तुं यतन्ते । चलच्चित्रेषु प्रदर्श्यमानाः अश्लीलाः प्रसङ्गाः युवजनान् सभ्यान्मार्गात् च्यावयन्ति । बहवः स्वयमपि चलच्चित्रे भागं वोढुं स्वप्नान् निर्मान्ति । केचन तत्र प्रयत्नानेव कुर्वन्ति । तैः सहनटैः पोषकनटैर्वा भाव्यम् । कदाचित्तु तदपि न । चलच्चित्रमोहेनैव केचन गृहमपि त्यक्त्वा धावन्ति ।

चलच्चित्रनिर्देशकानां कश्चन कर्तव्यभारः (responsibility) अस्ति । ते उत्तमस्तरीयाण्येव चलच्चित्राणि कुर्युः । चलच्चित्रेषु दृश्यमाध्यमेन कथावस्तु नेत्राणाम् अग्रे साक्षात् प्रदर्श्यते । दृश्यमाध्यमम् अत्यन्तं प्रबलं माध्यमम् । अस्य दुरुपयोगः समाजं नीचश्रेणीं नयति । सत्यं, नीतिः अहिंसा इत्यादिसद्गुणाः ये

पितृभ्यां पुत्रेभ्यः बोध्यन्ते ते सर्वे चलच्चित्रदर्शनेन अदृश्या भवन्ति। यतः असत्यम्, अन्याय्यं, दौष्ट्यम् इत्यादिकं तत्र प्राधान्येन प्रदर्श्यते ।

भारतीयायाः सत्य-धर्मादिमौल्य-परम्परायाः प्राशस्त्यं उद्गृह्णतां चलच्चित्राणां सङ्ख्याऽत्यन्तं विरला । चलच्चित्रैः पर्याप्तमात्रया समाजोपरि साधुः प्रभावो न पतति; किन्तु निम्नस्तरीयैः चलच्चित्रैः असाधुरेव प्रभावः पततीति विषादेन वक्तव्यमस्ति ।

३९. कृतकः उपग्रहः

मूलतः उपग्रह इत्ययं शब्दः भूमिप्रभृतीन् ग्रहान् परितः परिभ्रमतः आकाशकायान् बोधयति । किन्तु अस्मिन् प्रबन्धे 'विज्ञानिभिः वैज्ञानिकसंशोधनानां कृते उड्डायितानि, स्वतश्चलानि, भूमिं परितः भ्राम्यन्ति च उपकरणानि' इत्यस्मिन्नर्थे शब्दोऽयं प्रयुक्तः ।

केचन उपग्रहाः भूमि-कान्तक्षेत्रात् आत्मनः मोचयित्वा चन्द्रं प्रति धावन्ति । आबहोः कालात् चन्द्रस्य विषयः जनानां मनस्सु पर्याप्तमात्रया कुतूहलं वर्धयन् अस्ति । तेन कुतूहलेन प्रेरिता जना नानाविधाः उदन्तकथा अपि कथयितुमारभन्त । किन्तु विज्ञानयुगे तादृशीनां कथानां न किमपि स्थानमस्ति । विज्ञानस्य भूमिकया "चन्द्रः कीदृशं वस्तु, तस्य सृष्टिः कथमभवत्?" इत्यादयोंऽशाः प्रधाना भवन्ति ।

चन्द्रं प्रति संशोधने उपग्रहाः महत्त्वपूर्णं पात्रं निर्वहन्तीत्युक्त्या अपरेषां ग्रहाणां विषये, सूर्यस्य विषये नक्षत्राणामपि विषये

संशोधनकर्मणि उपग्रहैः महत् साहाय्यमारच्यत इति स्वयमुक्तं भवति ।

उपग्रहाणां डायनं विविधानि भूमिविषयकान्यपि वैज्ञानिकानि संशोधनानि सुलभीकरोति । वायुगोलस्य चलनवलनयोर्निष्कर्षः, तद्द्वारा वृष्टेः वात्यायाः वा प्राक्-सूचना, विश्वस्य सकलभागतः भूमिं प्रति आगच्छतां विश्वकिरणानाम् अध्ययनं, भूमण्डलीयस्य कान्तक्षेत्रस्य गतेः सूक्ष्मं परिशीलनं, दूरदर्शनादिसमूहमाध्यमतः आगच्छतां कार्यक्रमाणां प्रति-प्रसारः इत्यादीनि बहूनि प्रयोजनानि उपग्रहोड्डायनस्य उद्दिष्टानि । एते उपग्रहाः भूमिं परितः निर्दिष्टे दूरे भूमि-वेगसम-वेगेन परिभ्रमन्ति । एतेन चलनराहित्यमिव तेषां जायते; ततश्च भूमिष्ठैः सम्पर्ककेन्द्रैः सम्पर्कं साधयितुं ते शक्नुवन्ति ।

भूमावेव स्थित्वा क्रियमाणे बाह्याकाशविषयके संशोधने केचन क्लेशाः बाधाकारिणो भवन्ति । प्रथमतः भूमिं परितो वर्तमानं मेघमण्डलं केषाञ्चन नक्षत्राणां प्रकाशं निवारयति, येन तद्विषयकं संशोधनं दुष्करं भवति । भूमिं परितो वर्तमानम् ओज़ोन्कवचमपि कांश्चन किरणान्- नाक्षत्रान् सौरान् वा- वारयति; तेन, ते भूमिं न प्राप्नुवन्ति । फलस्वरूपेण भूमावेव स्थित्वा क्रियमाणानि अन्तरिक्षविषयकानि संशोधनानि न पूर्णानि किन्तु भग्न-भग्नानि प्रतीयन्ते । किन्तु एते दोषाः विज्ञानिभिः उड्डायितेषु कृतकेषु उपग्रहेषु न सम्भवन्ति । तत्र स्थापितानि उपकरणानि भूतले विज्ञानप्रयोगमन्दिरैः सह सम्पर्कं सततं साधयन्ति । एतेन आकाशकायानां चित्राणि शुद्धस्वरूपेण शीघ्रशीघ्रं लभ्यन्ते ।

शुक्रं प्रति मङ्गलं प्रति च बहवः उपग्रहाः उड्डायिताः । ते तयोर्ग्रहयोः समीपतमात् स्थलात् विस्तृतानि अभ्यासयोग्यानि चित्राणि प्रैषयन् । शनिग्रहं परितः वलयाः सन्तीति तु पूर्वमेव सुज्ञातो वृत्तान्तः । किन्तु युरेनस्ग्रहं परितोऽपि वलयाः सन्तीति ऐदंप्राथम्येन पयोनीर्नाम्ना उपग्रहेण प्रेषितैः चित्रैर्ज्ञातम् । शतकोटिवर्षेभ्यः प्राक् भूमिं परितोऽपि तादृशाः वलया आसन्नित्यपि कश्चन सिद्धान्तः प्रकाशितः ।

प्रतिक्षणम् एकादशमैल्वेगेन उड्डायितं किमपि वस्तु भूमेः गुरुत्वाकर्षणशक्त्याऽऽत्मानं मोचयित्वा बाह्यमन्तरिक्षं प्रति उत्पतति । एतद् वैज्ञानिकं तत्त्वमुपयुज्य विज्ञानिभिः उड्डाय्यमानेषु एतेषु उपग्रहेषु महत् अद्भुतमिति परिगणयितुं योग्य उपग्रहः पयोनीर् । एषः सौरमण्डलम् एव त्यक्त्वा बाह्यनक्षत्रलोकमधुना प्रविष्टोऽस्ति ।

भविष्यति काले एतेषाम् उपग्रहाणां साहाय्येन कानि कानि अद्भुतानि संशोधनानि च कर्तुं शक्यन्त इति विषये विज्ञानिन इव सामान्या अपि जनाः कौतुकाविष्टाः सन्ति ।

४०. भारतीया संस्कृतिः

जीवनविधानम् एव संस्कृतिः । एकस्याः एव व्यक्तेः जीवनं नात्र परिगण्यते, परन्तु समाजस्य सर्वेषामपि जनानां (स्त्रीणां पुरुषाणां च) व्यवहारक्रमाः, विद्याभ्यासपद्धतयः, परम्परीणा आचाराः, धार्मिका विश्वासाः, विवाहादिप्रसङ्गोचितानि साम्प्रदायिकानि कर्माणि एतत् सर्वं परिगण्यते ।

संस्कृतिर्नाम– आन्तरङ्गाणां बाहिरङ्गाणां च गुणानाम् आधानं (=स्थापना) दोषाणां च अपनयनम् (=दूरीकरणम्) । तत्र कारणीभूतं यद् यद् वर्तते तत्तत् सर्वं संस्कृतिः ।

संस्कृतिदृष्ट्या भारते निवसन्तीनां प्रजानां स्पष्टानि कानिचन लक्षणानि विद्यमानानि गोचरीभवन्ति :-

१. अहिंसायां श्रद्धा ।
२. प्रायेण प्राचीनेषु आचारेषु विश्वासः ।
३. अतिथिसत्कारे प्रीतिः ।
४. पञ्चाङ्गे, पुराणश्रवणे, फलज्यौतिषे च नैसर्गिकी आसक्तिः ।
५. सङ्गीतनृत्ययोः अभ्यासे प्रायेण उत्साहः ।
६. कौटुम्बिकस्य जीवनस्य विषयेऽतीव अभिरुचिः ।
७. शान्तिम् उपदिशतां प्रवचनकाराणां विदुषां संन्यासिनां च विचारे उत्कटः आदरः ।
८. आहारस्वीकारे केचन दृढाः नियमाः ।
९. पुनर्जन्म, स्वर्गः, नरकः, कर्मसिद्धान्तः, ईश्वरः, शास्त्रम् – इत्यादिषु गाढं चिन्तनम् ।
१०. सरलं जीवनम् ।

एतेषाम् अंशानाम् अपवादाः न सन्तीति न । विज्ञानस्य क्षिप्रगत्या प्रगत्या, उद्योगसमस्याभिः, आर्थिकात् कारणात्, नवीनैश्च विद्याभ्यासक्रमैः भारतीयायां संस्कृत्यां बह्वयो नवीनाः

आकाराः (क्वचिच्च विकाराः!) स्थानं प्राप्तवन्तः । परन्तु संस्कृतिर्नाम नैव स्थगितता । कालक्रमिकं परिवर्तनमपि संस्कृतेः अङ्गम् । अस्मत्पूर्वजानां प्राचीनकालिक्यां जीवनशैल्यां कोऽपि दोषो नासीदिति न । बाल्यविवाहः, देवदासीपद्धतिः, पुरुषाणां बहुविवाहाः, यावज्जीव-दास्यम् ('जीत' इति कन्नडभाषायाम्) अस्पृश्यताचरणम् इत्यादयोऽनेके दोषाः भारतीयान् प्रगतिहीनान् अकुर्वन् ।

अद्यत्वे दोषाणाम् एतेषां क्रमेण निवारणं सञ्जायमानं दृश्यते । अस्पृश्यताद्याचरणं प्रायेण नगरेषु नैव दृश्यते । ग्रामेषु अपि एतद् विरलं सञ्जातम् । अर्थात्, भारतीया संस्कृतिः यथा परम्परीणान् विचारान् वहति तथैव नवीनामपि जीवनरीतिम् अन्तर्भावयते ।

जीयाद् भारतीया संस्कृतिः!!

४१. सामाजिकाः कण्टकाः

"प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥"

एतत् सुभाषितं मूलतः मनुष्ये वर्तमानस्य पशुत्वस्य विचारे अङ्गुलीनिर्देशनं करोति । विद्याभ्यासेन, विवेकेन, साधुभिश्च व्यवहारैः मनुष्यः स्वस्य पशुत्वं विनाश्य सत्पुरुषत्वं प्राप्नुयात् । पशुत्वेन मनुष्यस्य शान्तिर्नश्यति, बुद्धिः सङ्कुचिता भवति, कोऽपि कमपि अन्यं गैरवेण न वीक्षते, सर्वत्र च हिंसायाः एव साम्राज्यं प्रसरति ।

नागरकता यथा यथा वर्धते तथा तथा सभ्यतापि वर्धेतेति निरीक्षा स्वाभाविकी। किन्तु वस्तुतः अस्माभिरद्यत्वे किं दृश्यते? क्षुल्लकैः कारणैः दुष्प्रचोदितानां जनतानां मध्ये हिंसा, धनाशया हत्या, दम्पत्योर्मध्ये कलहेन पत्युः पत्न्या वा विषप्रयोगेण मारणमित्यादिन्यो वार्ताः दैनन्दिनो विषयोऽस्ति। एतत्तु अतितमां विषादास्पदं यत् विद्यावताम् अनेकपदवीधराणाम् उन्नतोद्योगवतां ''प्रशस्त''स्तरे वर्तमानानामेव मध्ये एतादृश्यो घटनाः सम्भवन्तीति ।।

कस्याञ्चन दिनपत्रिकायाम् एषा वार्ता प्रकटिता यत् कस्मिंश्चन क्रयविक्रयव्यवहारे ग्राहकः न्यूनमूल्येन क्रेयं वस्तु अपैक्षत। किन्तु विक्रेता तन्नाङ्गीचकार। उद्विग्ना वाचः ऐधन्त। क्रेता विक्रेतारं छुरिकयाऽहन्। एतादृशी अन्याऽपि वार्ता मासेभ्यः पूर्वं प्रकटिता यत् शाकविक्रेता परीवर्तं न दत्तवानिति हेतोः क्रुद्धः सन् ग्राहकः लगुडेन तं बलवत् प्राहरत्। अनुपदं विक्रेता अम्रियत। एतादृशीषु घटनासु दृष्टासु ''वयं किं क्रमेण प्रगतिपथे सञ्चरितुं प्रभवामो वा विगतिपथे चरामो वा'' इति संशयो जायते।

प्राचीनकाले यदा मनुष्यस्य जीविका एव हिंसाऽऽधारिता आसीत्; तदा लगुड एव तस्य परमः सखा, परशुरेव तस्याचार्यः, अश्म एव च तस्य बन्धुरासीत्। पशून् पक्षिणः हत्वा तन्मांसेन सः जिजीविषति स्म। अर्थात् हिंसां विना तस्य जीवनं प्रायशः असम्भवमासीत्। तस्मात् कारणात् तदीया हिंसा क्षमार्हा। अपि च केवलं जीविकायै सः हिंसाम् आश्रयते स्म। भोजनानन्तरं तस्य हिंसाऽनावश्यकी आसीत्।

यथा यथा मनुष्यस्य नागरकताऽवर्धत, तथा तथा हिंसाप्रवृत्तिरपि अवर्धत । युद्धघटनाः अत्र साक्षान्निदर्शनम् । कदाचिद् युद्धानि अनावश्यकानि आसन् । तथाऽपि स्वार्थप्रेरितैः राजभिः तदनुयायिभिश्च युद्धार्थं प्रयत्ना अनुष्ठिताः येन मुग्धा निष्पापाः सहस्रशो जनाः प्राणान् अत्यजन् ।

आर्थिकैः कारणैः क्वचिद् युद्धमावश्यकं भवतीति वक्तुं शक्यत्वेऽपि; युद्धम् अनपेक्षमाणानां तथा युद्धे कथमपि अ-संलग्नानामपि जनानां प्राणहानिं समर्थयितुं कोऽपि विवेकी न वाञ्छति ।

ग्रामेष्वपि अद्यत्वे हिंसाचारो गगनव्यापी सम्भूतः । तत्र जातिराजकीयं जुगुप्सावहं निम्नं स्तरं स्पृशद् वर्तते । एकस्याः जातेः सम्बद्धा व्यक्तिः, अपरस्य जातेः सम्बद्धां व्यक्तिं द्वेष्टीत्येतत् नूनम् अस्माकं देशस्य परम्परीणां ''अहिंसा परमो धर्मः'' इति घोषणाम् अपहासयति ।

बेङ्गलूरु-मुम्बयी इत्यादिषु प्रदेशेषु धनार्थं केचन निरुद्योगा युवकाः हत्यादि-दुष्कर्मसु संलग्नाः भवन्ति । तेषां काश्चन सङ्घटनाः भवन्ति । तासां केचित् प्रधानाधिकारिणोऽपि वर्तन्ते! सामाजिकैः वैयक्तिकैर्वा द्वेषैः प्रचोदिता व्यक्तयः एतत्-पूर्वोक्त-युवक-द्वारा स्व-द्विष्टानां व्यक्तीनां हत्यां कारयन्ति, तदर्थं धनमपि तेभ्यो यच्छन्ति ।

''क्षुल्लकैः कारणैः मारणाय, अङ्गोपाङ्गभञ्जनाय वा प्रयत्नाः नागरकस्य न युज्यन्ते; विवादस्थलानि परस्परेण आलोचनामूलकैः

संवादादिभिः परिहरणीयानि'' इति चिन्तनं यावत्पर्यन्तं सर्वेऽपि न कुर्वन्ति, चिन्तनदिशा वा कार्याणि नानुतिष्ठन्ति, तावत्पर्यन्तं सामाजिकानां कण्टकानां निवारणा केनापि सर्वकारेण केनापि शासनविधिना वा कर्तुं न शक्यते ।

४२. भ्रष्टाचारः

सुप्रसिद्धः अर्थशास्त्रप्रणेता कौटिल्यः ''यथा मीनाः समुद्रे सञ्चरन्तः कदा जलं पिबन्तीति वक्तुं न शक्यते, तथा सर्वकारीया उद्योगिनः अधिकारिणो वा कदा उत्कोचं स्वीकुर्वन्तीति वक्तुं न शक्यते'' इति कथयति ।

अद्यत्वे उत्कोचस्वीकारः समाजस्य सर्वेष्वपि क्षेत्रेषु उत्कृष्टतां नाशयन् सर्वभक्षकः कीटक इव जातोऽस्ति । यथा पुत्तिकाः वृक्षम् आवृत्य क्रमेण वृक्षं निपातयन्ति तथा उत्कोचस्वीकर्त्र्यो व्यक्तयः सर्वकारीयम् असर्वकारीयं (private) वा रङ्गं कलुषयन्ति । काञ्चन घटनां स्मरामि यत्र कश्चित् प्रौढशालाविद्यार्थी स्वगम्यमानां शालां त्यक्त्वाऽपरां शालां प्रवेष्टुमैच्छत् । तत्र कारणं तु तेन गम्यमानायां शालायां पाठप्रवचनानि सम्यङ् न क्रियन्ते स्म । तेन गन्तुमिष्टायाः अपरस्याः शालायाः मुख्योपाध्यायः तं विद्यार्थिनं स्वशालायां प्रवेशयितुं पञ्चदशसहस्ररूप्यकाणि अपैक्षत ।

अरण्यस्य उत्पन्नवस्तूनां (products) नयनम् आनयनं वा कांश्चनशासनिकान् विधीन् अवलम्बते । उदाहरणार्थं चन्दनवृक्षस्य दारूणां (log) नयनम् । किन्तु सम्बद्धाः अधिकारिणः

कदाचिदुत्कोचं स्वीकृत्य, चन्दन-दारुणः अवैधं (illegal) नयनं अनुमन्यन्ते ।

बद्धानां कु-ख्यातानां चोराणां पश्यतोहराणां वा अवैधैः मार्गैः मोचनं, निम्नस्तरीयाणाम् आयुधानां सैन्येन क्रयः इत्यादिकाः घटनाः पत्रिकासु नित्यं प्रकाश्यन्ते ।

बेङ्गलूरुनगरतः अन्यान् प्रदेशान् स्थानान्तरणरूपेण गन्तुं केचन अभियन्तारः (Engineers) नापेक्षन्ते । यदा तेषां स्थानान्तरणं (transfer) क्रियते तदा ते तद्विषयकम् आदेशम् अवैधैः क्रमैः कथञ्चित् निवारय्य पुनः बेङ्गलूरुनगरम् एव निवर्तन्ते ।

सर्वकारीय-कार्यालयेषु यदाऽधिकृतानि पत्रकानि (files, documents) सम्बद्धस्याधिकारिणः हस्ताक्षरं शीघ्रं न प्राप्नुवन्ति, तदा "करोष्णीकरणात्" सर्वं सुलभं सञ्जायते ।

अवैधानि कार्याणि सर्वाण्यपि "भ्रष्टाचार"स्य व्याप्तौ आयान्ति । भ्रष्टाचारे निरतानां सर्वेषां सदाऽपि सुखसमृद्धिरेव जायत इति वचनं न सत्यम् । बहुषु प्रसङ्गेषु ते गृह्यन्ते, बध्यन्ते, दण्ड्यन्ते च । किन्तु कदाचिदेतदपि सम्भवं यद् भ्रष्टाचारस्य सूत्रधाराः कथञ्चित् च्यवन्ते; तदाज्ञाधारकाः केचन वराकाः निगृह्यन्ते । अथवा बद्धा अपि भ्रष्टाचारिणः प्राड्विवाकानां (advocates) वादचातुर्यकारणात् निरपराधत्वेन न्यायालये साधिता भवन्ति, विमुच्यन्ते च ।

एतादृशः भ्रष्टाचारः केवलमस्माकं देशेऽस्तीति न भ्रमितव्यम् । केभ्यश्चन वर्षेभ्यः पूर्वम् अमेरिकादेशे "वाटर्गेट्" प्रकरणम्

अत्यन्तं कुख्यातम् अभवत् । तत्र ये संलग्नाः तेषां मध्ये बहुभिः स्वोद्योगाय त्यागपत्रं दातव्यमभूत् । स्वयं तदानीन्तनः अमेरिकाध्यक्षः निक्सन् एव अस्य प्रकरणस्य नायकस्थाने विराजते स्म ।

भ्रष्टाचारनिर्मूलनाय शासनं न पर्याप्तम् । ''उत्कोचस्वीकर्ता यथाऽपराद्धः, तथैव उत्कोचदाताऽपि'' । स्वेषां कार्याणां शीघ्रम् अनुष्ठानाय जना उत्कोचं दत्वा रोगममुं वर्धयन्ति । यदि जनाः उत्कोचं न दद्युः, भ्रष्टाचारे निरतानां यदि च उग्रो दण्डो विधीयते, क्रमेण भ्रष्टाचारो निर्मूलितो भविष्यति । भ्रष्टाचारनिवारणेऽन्यः पन्थाः न विद्यते ।

४३. देशस्य अखण्डता, तस्याः विघ्नाश्च

केचन वदन्ति यत् ब्रिटिष्जनानां भारते आगमनात् प्राक् भारतस्य एकताविषये अखण्डताविषये च भारतीयाः किमपि नाजानन्; किन्तु ब्रिटिष्शासकैः ऐदंविषयकानि चिन्तनानि ऐदम्प्राथम्येन प्रसारितानीति ।

किन्तु नैतत् सत्यम् । आबहोः कालात्, रामायणमहाभारते अस्माकं देशस्य अखण्डताभावनायाः रूपणे महत्त्वपूर्णं पात्रं निरवहताम् । आसेतोराहैमाचलं विद्यावन्तोऽविद्यावन्तश्च रामायणं जानन्ति, महाभारतञ्च । यद्यपि विविधाः भाषाः नैका आचारपद्धतयः, भिन्नाः वेषसम्प्रदायाः अगणिताः मत-सरणयः जातयश्च भारतस्य नानास्वरूपाणि प्रदर्शयन्ति, न तु एकताम्,

तथाऽपि अस्मिन् वैविध्यमये महति देशे गूढरूपेण एकता तिष्ठति। तस्मात् कारणादेव आधुनिकः संस्कृतकविः ''सर्वगन्धा'' सम्पादकश्च डा. वीरभद्रमिश्रः स्वकीयायां कस्याञ्चन कवितायां ''एकता भेदेऽपि गूढा'' इति गीतवान्।

अद्यत्वे भारतस्य अखण्डताविचारः न केवलं अस्माकं राजकीयान् नेतॄन्, किन्तु साधारणानपि जनान् चिन्तामग्नान् कुर्वन् हृदयदाहिका पीडा संवृत्ताऽस्ति । भाषाकारणतः, सम्प्रदायकारणतः, मतकारणतश्च एकः अपरस्य शिरो दारयतीत्येवंरूपा घटना नित्यवार्ता सञ्जाता। अल्पसङ्ख्याता जनाः 'तद्विचार'स्यैव बलेन बहुसङ्ख्यातान् भाययितुम् आलोचयन्ति । मतानां मतीनाञ्च प्रभेदकारणात् हृदयभेदनार्थमपरे प्रयतन्ते । स्वेषाम् उद्देश्यस्य साधनार्थं वामान् मार्गाननुसरन्ति । गृहाणां दहनं, मुग्धानां जनानां हत्या, सेतूनां भङ्गः, अश्मप्रक्षेपणं, किमपि अजानतां यूनां दुष्प्रचोदना इत्यादिकमेतेषां नित्यकृत्यम्। अत्यन्तं चिन्ताया विषयो नाम कदाचिदेतेषां समाजघातुकानां धनायुधादिकाः सामग्र्यः परदेशतो लभ्यन्ते । यानि आयुधानि केवलं सैन्यस्य सविधे स्थेयानि, तानि यस्य कस्य पथिकस्यापि दुष्टस्य समाजपीडकस्य हस्ते सलीलं लभ्यन्त इत्येतन्नितरां दुःखकरम्।

पूर्वमूहितमासीत् यद् – 'भारतस्य स्वातन्त्र्यप्राप्तेरनन्तरं देशस्य अखण्डताविचारे चिन्ता न करणीया स्थास्यति; सर्वं मङ्गलकरं भविष्यती'ति । किन्तु वयमधुना किं पश्यामः? देशस्य बहवः

औत्तराहाः प्रान्ताः स्वयंशासनाधिकारम् अपेक्षमाणाः सन्ति । केन्द्रसर्वकारम् अस्मिन् विचारे अनुकूलयितुं सर्वविधान्यपि दुष्कृत्यानि आचरन्तः सन्ति । केन्द्रसर्वकारेण सर्वदाऽपि उदासीनेन न भाव्यम् । परन्तु तेषां सर्वा अपि अपेक्षाः अङ्गीकर्तुं न शक्यन्ते । तेषां काश्चन अपेक्षाः ईदृश्यः– यत्तासाम् अङ्गीकारे भारतं भग्नभग्नं जायेत । देशस्य शासकीयायाः परिस्थितेरेव महती विपत् सम्भवेत् । आर्थिक्योऽपि परिस्थितयः अतीव नीचां दशां प्राप्नुयुः ।

तस्मात् देशनायकैः अस्मिन् विषये तथा दृढचित्तैर्भाव्यं यथा देशभञ्जकेभ्यः कठिनतराः दण्डाः विधीयेरन् । तेषां राष्ट्रविरोधिन्यः अपेक्षाः नैवाङ्गीकरणीयाः । समस्यापूरितेषु प्रदेशेषु क्वचिद् विद्याभ्यासस्य स्थितिर्न तृप्तिकरी भवति । तत्र किमपि अजानतां विद्यार्थिनां समूहं दुष्प्रचोदयितुं देशभञ्जकानां सुलभं भवति । राजकीयनेतारः तान् प्रदेशान् सम्यग् अभिज्ञाय तत्र शिक्षणस्थितीः उत्तमीकुर्युः । देशविघटनया प्रान्तीयानां समस्यानां परिहारः कदाऽपि न लभ्यते । परस्परेण समालोचनेनैव समस्यानां राजकीयं परिहारं कल्पयितुं शक्यत इति देशभङ्गम् अभिलषद्भ्यो ज्ञापयेयुः । एतैः उपायैः सम्यगनुष्ठितैः देशस्य अखण्डता सुरक्षिता स्थास्यति ।

४४. साहितीकारः

“योधस्य कृत्यं रणरङ्गे, लेखकस्य नृत्यं जनसङ्गे” ।
“खड्गधारा निशिता, लेखपङ्क्तिः निशिततरा” ।

इमे द्वे वचने साहितीकारस्य सामाजिकविचारेषु वर्तमानां कर्तव्यप्रज्ञां तस्य सामर्थ्यातिशयं च सम्यग् द्योतयतः । साहितीकारः स्वस्य भावनानां ग्रन्थरूपेण बहिःप्रकटने बद्धादरः । तस्य मनसि जायमानाः भावनाः समाजे तेन दृष्टानां, श्रुतानां, परोक्षरूपेण ज्ञातानां, साक्षाद् वाऽनुभूतानां घटनानां परिपाकरूपेण उत्तिष्ठन्ति । ताः भावनाः पुनः समाजं प्रत्येव यान्ति, तत्र कांश्चन तरङ्गान् अपि उत्पादयन्ति । अर्थात् साहितीकारस्य हृदयं समाजविषये घटनाग्रहणरूपेण, स्व-चिन्तननिःसारणरूपेण च द्विधा स्पन्दते ।

साहितीकारः केवलं लोके दृष्टाः घटनाः ग्रन्थरूपेण प्रसारयतीति वक्तुं न शक्यते । वस्तुतः तस्य अध्ययनक्षेत्रमपि विशालम् । पुरातनसाहित्यस्य बह्व्यः मौलिक्यः रचनाः तस्य आदरपात्राणि भवन्ति । समकालिकानामपि अनेकेषां ग्रन्थकर्तॄणां ग्रन्थान् सः सकुतूहलं सश्रद्धं च अधीते । तस्य गृहे महत्त्वपूर्णानां पुस्तकानां ग्रन्थालयः प्रायेण दृश्यते । सः ग्रन्थालयः सार्वजनिकः ग्रन्थालयः इव न महान्; तथाऽपि साहितीकारस्य अपेक्षितानां सकलविधानां पुस्तकानां सञ्चयनात् गरीयान् । तत्र विविधभाषामयाः शब्दकोशाः अपि सन्ति । साहितीकारः यस्यां कस्यामपि भाषायां रचितानां सर्वेषामपि उत्कृष्टग्रन्थानां विषये गौरवयुक्तां भावनां प्रदर्शयति ।

साहितीकारैः जगति यथा ऊर्ध्वस्तरीयं चिन्तनं कर्तुं जनतायै प्रेरणा दीयते, तथा केनापि अन्येन न दीयते । स्वातन्त्र्यस्य

आयोधनकाराः नेहरू, गान्धी, अरबिन्दो इत्यादयः भारतस्य महापुरुषाः साहितीकाराः आसन् । संस्कृतेऽपि व्यासवाल्मीकि-कालिदासादयः साहितीकाराः एव भारतस्य सनातनं धर्मदीपं स्वीयाभिः उज्ज्वलाभिः रचनाभिः अदीपयन् । विजयन्तां सर्वे साहितीकाराः ॥

४५. प्रबन्धः तस्य रचना च

प्र-सिद्धस्य अथवा प्र-सिद्धीभवितुं योग्यस्य वस्तुनः प्र-शस्तया रीत्या प्रकृष्टं मार्गमाश्रित्य प्र-चारस्यार्थे लेखनस्वरूपेण प्र-युक्तं बन्धनमेव प्र-बन्धः निबन्धो वा । एष शब्दः किमपि वस्तु अधिकृत्य सरलया स्पष्टया च गद्यशैल्या लिखितं विचारखण्डम् अन्वेति । केवलं संवादेन येंऽशाः न स्पष्टा भवन्ति ते सर्वे प्रबन्धरचनायां स्पष्टा भवन्ति । न केवलमेतावदेव; प्रबन्धैः वयम् अस्माकं हृद्गतान् प्रौढान् विचारान् अन्येभ्यः सम्यग् ज्ञापयितुं शक्नुमः । स्पष्टतरं लेखनार्थं किञ्चित् कौशलमपेक्षितं, तच्च कौशलम् आसादयितुं श्रद्धापूर्वकोऽभ्यासः आवश्यकः ।

वस्तुनः वरणं प्रबन्धरचनायै करणीयः प्राथमिकः स्तरः । अस्माकं कुतूहलप्रदान् तथा ज्ञातान् विषयान् वृत्वा प्रबन्धं लिखितुं शक्यते । अतीव विस्तृतान्, वादान् अपेक्षमाणं वा वस्तु त्यक्त्वा; प्रबन्धशरीर-प्रमाणापेक्षया केवलम् अल्पतरम् अवकाशम् अपेक्षमाणं वस्तु च त्यक्त्वा-प्रबन्धस्य विस्तारं नानाविधैः दृक्कोणैः व्याप्नुवत् वस्तु प्रबन्धरचनावसरे ग्राह्यं भवति ।

परन्तु प्रौढप्रबन्धानां रचनाप्रसङ्गे प्रौढानां सिद्धान्तानां समर्थना, नानावादैः युक्तिसमूहैः स्वसम्मतस्य विचारस्य प्रतिपादनम् इत्येतत् सर्वम् आवश्यकमेव ।

प्रबन्धरचनातः प्राक् प्रतिपाद्यानां विषयाणां काचन स्थूला पट्टिका निर्मातव्या । एषा पट्टिका रूपरेखेत्युच्यते । अस्यां च रूपरेखायां प्रबन्धे विशदीकर्तुमभीष्टानां मुख्यानां सामग्रीणां नामानि लिख्येरन् । नामलेखनानन्तरं तेषां विषयानुगुण्येन वर्गीकरणं विधेयम् । अस्य वर्गीकरणस्य अधिकं प्रयोजनं प्राप्तुं–मुख्यविषयाः प्राथमिकाः करणीयाः; गौणविषयाश्च द्वैतीयीकाः । विषयाणां पट्टिका लघुभिः वाक्यैर्वाक्यखण्डैः कर्तुं शक्यतेऽथवा पदैः कर्तुं शक्यते । एवं रूपरेखारचनायाः प्रयोजनमेतदेव यत् मुख्य-प्रतिपाद्य-विचारे किञ्चित् स्पष्टं चित्रणं प्रबन्धकृतो मनसि सन्तिष्ठते । यदि कानिचन परिवर्तनानि कर्तुं प्रबन्धकृदपेक्षते, रूपरेखारचना-समय एवतानि शक्यन्ते कर्तुम् । एतेन प्रबन्धरचनाकाले एव क्रियमाणैः परिवर्तनैः सम्भवतः कालापव्ययस्य अवसरो नोत्पद्यते ।

न कोऽपि प्रबन्धकृत् स्वीये प्रबन्धे प्रबन्ध-प्रतिपाद्यं वस्तु अधिकृत्य समग्ररूपेण प्रतिपादयितुं शक्नोति । किन्तु प्रबन्धकृतो मनसि-प्रबन्धपरिमाणं यावद् वर्तते-तावत्येव अवकाशे यथाशक्ति विषयान् सङ्ग्रहीतुं व्यवस्थितेन रूपेण च स्थापयितुं कुतूहलं वर्तते ।

प्रबन्धस्य प्रारम्भे सामान्योक्तिं, प्रसिद्धं वा कञ्चन श्लोकमुपन्यस्य नानादृष्टिभिस्तस्य प्रतिपादनं कर्तुं शक्यते । यदि

किञ्चन सजीवं निर्जीवं वा दृश्यं वस्तु प्रबन्धस्य प्रतिपाद्यं भवति, प्रथमे पीठिकारूपे प्रघट्टके एव तस्य स्वरूपवर्णनं करणीयम् । ततस्तस्य 'उपयोगः अथवा दुरुपयोगः' इत्यादिकम् । सामाजिकीनां समस्यानां विषये प्रबन्धलेखनमधिकमवधानमपेक्षते ।

प्रबन्धवाक्यानि सरलानि स्पष्टानि तथा विषयस्य साक्षात् प्रतिपादकानि च स्युः । केवलं पाठकानां कृते प्रबन्धा रच्यन्ते इति विचारं प्रबन्धकृत् कदाऽपि न विस्मरेत् । अर्थात्, विषयस्य बोधनार्थं प्रबन्धरचना, न तु स्व-पाण्डित्य-प्रदर्शनार्थम् ।

प्रसिद्धानाम् उक्तीनाम् उद्धृतयः यथाऽल्पाः तथा साधु । उद्धृतयो यथा यथाऽधिका जायन्ते तथा तथा प्रबन्धस्य स्वीयत्वं नश्यति, पाठकानां पठनकुतूहलं न्यूनीभवति, प्रबन्धः केवलं प्रसिद्धोक्तीनां सङ्कलनञ्च जायते ।

ज्ञातानां वस्तूनामपि विषयेऽप्रसिद्धा बहवः दृक्कोणाः सन्ति । न ते विस्मरणीयाः । यथासम्भवं हास्योक्तीनां सन्निवेशः प्रबन्धस्य विषये पाठकानाम् अभिरुचिं वर्धयति ।

प्रबन्धस्य शीर्षकत्वेन यन्नाम दीयते, तस्य सम्पूर्णतो न्यायदानं कर्तुं प्रबन्धकृताऽवहितमतिना भाव्यम् । अन्यथा प्रबन्धशीर्षकस्य तथा प्रबन्धशरीरस्य च मध्ये कोऽपि सम्बन्धो न तिष्ठति ।

प्रबन्धरचनाभ्यासः नव-नव-विचाराणां निरूपणाय उत्कृष्टानि ज्ञानद्वाराण्युद्घाटयति । अद्यत्वे नवीना विज्ञानविभागा एव जायमानाः सर्वेषामस्माकं दृश्यन्ते । एतादृश्यां परिस्थितौ

पुस्तकानां रचनावेगः–कियानपि स्यान्नाम न पर्याप्तः । तस्मात्, यस्मिन्नपि कस्मिन्नपि क्षेत्रे पुस्तकानां रचनायाः प्राक् प्रबन्धरचनाभ्यासः सर्वेषामपि सुशिक्षितानां कृते अत्यन्तमावश्यकः प्रतिभाति ।

४६. जानपदम्

कस्यचित् जनवर्गस्य अथवा जनपदस्य सामूहिकाभिव्यक्तिस्वरूपेण पैतृक-परम्परया सञ्चलत् गानम्, ऐतिह्यं, कथाः, प्रहेलिकाः, सुभाषितम्, आचारः, वैद्यकीयं, मन्त्रविद्या, चित्रकला, शिल्पकला इत्यादिकं सर्वां ''जानपदम्'' इति शब्देनाभिधीयते । जनपदम् इति शब्दस्य जनता इत्यर्थः । जनपदस्य समग्रा सम्पत् ''जानपदम्'' । जानपदमिति शब्दस्य ऐदंप्राथम्येन सूचनां कृतवान् कन्नडस्य सुप्रसिद्धः साहितीकारः हा.मा. नायकमहाशयः ।

''जानपदम्'' इति शब्दं श्रुत्वा बहवः भावयन्ति यत्-एष शब्दः केवलं गायनं सूचयतीति । किन्तु गायनं जानपदसिन्धोः केवलं कश्चन बिन्दुः । जानपदस्य व्याप्तिः इतोऽपि अत्यन्तं विस्तृता गम्भीरा च । मूलतः जानपदम् एकस्या व्यक्तेर्द्वाराऽऽविर्भवति । क्रमेण तस्य परिधिः विस्तृतीभवन् समाजस्य समग्रान् वर्गान् व्याप्नोति । एवं क्रमेण जानपदं सामाजिकी अभिव्यक्तिर्भवति ।

जानपदं चतुर्षु विभागेषु विभाजयितुं शक्यते । प्रथमो विभागः साहित्यं; यत्र पुराणं, ऐतिह्यं, कथाः, गायनमेतानि आयान्ति ।

द्वितीयो विभागो भाषिकं; यत्र सुभाषितं, नीत्युपदेशः, प्रहेलिकाः आभाणकाः, चतुरोक्तयः, चमत्कारिकगणितमेतान्यन्तर्भवन्ति । तृतीये भागे विज्ञानवर्गे वैद्यकीयं, भविष्यं, नानारीत्या वर्तमाना अन्धविश्वासाः, मन्त्र-तन्त्रादयः इत्यादिकं संयोज्यते । चतुर्थविभागे क्रियात्मकवर्गाख्ये सङ्गीतं, नृत्यं, विविधाः कलाः, पाकनैपुण्यं, विविधपर्वाणि, क्रीडा इत्यादिकं परिगण्यते ।

केषाञ्चन विदुषामभिप्रायानुसारेण साहित्यं भाषिकमिति भागद्वयकल्पनाऽनावश्यकी, भाषिक-साहित्ययोः प्रायः पर्यायार्थकत्वात् ।

जानपदवाङ्मयं कश्चन अक्षयो झरो, यत्र सर्वेऽपि साहित्यरसिकाः स्वेषां पिपासाम् अपनाययन्ति । जानपदगायकाः सहजैः भावैः हृदयस्य गानं प्रकृतेः रम्येन दृश्येन संयोजयन्ति । शास्त्रीयसङ्गीते दृश्यमानं गाम्भीर्यं तत्र प्रायेण न लभ्यते । जानपदगायकीयस्य माधुर्यस्य गरिमा स्वच्छन्दं धावन् वन्यो हरिण इव सर्वेषां हृदयं बन्दीकरोति । केचन वेणुं वादयन्ति । तेषां वेणुनादस्य स्वरव्याप्तिः शास्त्रीयस्वर-व्याप्त्यपेक्षया सङ्कुचितः, तथाऽपि सा हृदयम् आवृणोति । अन्यदपि वाद्यवैविध्यं जानपदसङ्गीते दृश्यते ।

जानपदवाङ्मयं कथाभिः समृद्धम् । एताः कथाः राजभिः राज्ञीभिः, राजकुमारैः राजकुमारीभिश्च निबिडाः । मन्त्रतन्त्रादिकं, देवताः, पिशाचाः, पशवः, पक्षिणः अद्भुतम् एतादृशाः सर्वेऽपि विभवाः अत्र सन्ति । अत्र आगच्छन्तः सर्वेऽपि पशवः पक्षिणः

कीटा अपि मनुष्यवद् भाषन्ते । प्रायेण कथास्वेतासु भाषा प्रवाहवद् द्रुतगत्या प्रवहति । लाक्षणिक्य: (=symbolic) कथा अपि अत्र पुष्कला: । संस्कृते प्रसिद्धानां कथानां मूलं वस्तु जानपदादेव वाङ्मयाद् गृहीतम् ।

प्रायेण जानपदसङ्गीत (लोकगीत)वाङ्मयस्य, कथाप्रपञ्चस्यापि मूलनिर्माता क इति ज्ञातुं न शक्यते । उदाहरणार्थं सुप्रसिद्धस्य गोगीतस्य रचयिता क इति न ज्ञायते । किन्तु तदद्यापि सुप्रसिद्धम् । 'गोगीतस्य नाम अश्रुतवान् कन्नडभाषी नास्त्येव' इत्युक्ते नातिशयोक्ति: स्यात् ।

जानपदकलाऽपि निराभरणसुन्दरीव स्वस्या: स्वाभाविकेन सौन्दर्येण द्रष्टॄन् अयस्कान्तमणिरिव आकर्षति । पक्वानां शाकानां रसत:, मृत्स्नातश्च लब्धानां वर्णानां लेपनेन जानपदकलाकारा: चित्राणि चित्रयन्ति । जानपद-जीवनस्य समग्रं बिम्बमेव तेषु चित्रेषु गोचरीभवति । नयनं बन्दीकुर्वन्तीनां रङ्गवल्लीनां विन्यसने जानपद-कलाविदं कोऽपि नातिक्रामति । ''नागमण्डल'' नाम्न: पर्वण: प्रसङ्गे चित्र्यमाणं नागमण्डलचित्रं कोऽपि साधारण: चित्रकलाविन्नैव चित्रयितुं शक्नोति ।

जानपदकलावित् लौकिकव्यवहारेषु प्रायेण न चतुर: । स: वदति :- ''युष्माकं नागरका: सम्प्रदाया न मया ज्ञाता: । युष्माकं शास्त्रस्य नीतीर्न जाने; नियमांश्च न वेद्मि । किन्त्वेतदेव केवलं जाने–हृदयं यदा उल्लसति तदा गायामि । उद्वेगेन यदा मम हस्त: कूर्चिकां गृह्णाति तदा चित्रयामि । देवतायां मम महती भक्ति: ।

तुष्टा देवता ममाभीष्टं ददाति; रुष्टा तु शापं ददाति । तत्प्रीत्यै पूजाः आचरामि । किमपि पर्व न विस्मरामि । देवताप्रीत्यर्थं गायामि, नृत्यामि । मम नृत्यं शास्त्रीयं भरतनाट्यमिव न सङ्कीर्णम् । किन्तु अतीव सरलम् । आवेशयुक्तानि पदानि हृदयगतान् सर्वानपि भावान् बहिः प्रकटयन्ति । ललितैः कोमलैश्च वाक्यैः मम सङ्गीतम् ओतप्रोतम् । कोकिल इव स्वच्छन्दं गायामि । मयूर इव स्वच्छन्दं नृत्यामि । एतदेव मम जानपदं जीवनम् । बाह्यविश्वस्य कापट्यं, वञ्चना इत्यादिकं किमपि मम न ज्ञातम् । तथाऽपि मम जानपदं तथा गम्भीरं कुतूहलकरञ्च यथा मानवशास्त्रज्ञाः (Anthropologists) अपि अद्यत्वे मम जीवनस्य विविधान् प्रकारान् अधीतुकामाः सन्ति ।

"किन्तु मम मनसि कश्चन विषादोऽस्ति यत् आधुनिकाः युवानः प्रायेण मम सङ्गीतं; मम नृत्यं मम चित्रकलां वा न रोचयन्ते । स्वदेशे ग्रामीणैः कलाप्रपञ्चे साधिता सिद्धिः किंस्तरीया इत्यमुष्मिन् विषये तेषां मनसि किमपि कुतूहलं नास्ति । तेषां चक्षुषोरुपरि केवलं स्वजीविकाविषये स्वप्नाः दृश्यन्ते ते कदाऽपि अस्माकं वर्णमयं ब्रह्माण्डं न वीक्षन्ते । अयमेव मम विषादस्य हेतुः ॥"

जानपद-शास्त्रमित्याख्यं किञ्चिद् विज्ञानमेव अद्यत्वे जातमस्ति । तत्र जानपदकथानां शास्त्रीयया वैज्ञानिक्या च पद्धत्या कृतं वर्गीकरणं जानपदकथावाङ्मयस्य वैभवं द्योतयति ।

४७. भाषणकला

कश्चन इङ्ग्लीषुकविः "भाषणस्य प्रसङ्गे द्विविधा जना वर्तन्ते—केचन वैरस्यं (boring) अनुभवन्ति; अपरे वैरस्यम् उत्पादयन्ति" इति कथयति । भूयःसु प्रसङ्गेषु एवमेव भवति । वैरस्योत्पादनं विना भाषणं कथं कर्तव्यमिति बहवः न जानन्ति । केवलं विषये प्रभुत्वमथवा भाषायां प्रभुत्वं कामपि व्यक्तिं सफलां भाषणकर्त्रीं कर्तुं नालम् । भाषणं कथं करणीयमित्यपि विषये सा व्यक्तिः सम्यग् जानीयात् ।

भाषणस्य स्वरूपं त्रिभिः अङ्गैः रूपितं वर्तते— पीठिका, भाषणशरीरम् (प्रतिपाद्यस्य वस्तुनः प्रतिपादनं) उपसंहारश्चेति ।

प्रथमतः भाषणस्य विषयं सम्यगेव प्रस्तुत्य भाषणे के मुख्यविचाराः प्रतिपिपादयिषिता इति कथनं साधु । एतेन सर्वेऽपि श्रोतारः भाषणस्य समग्रमपि स्वरूपं ज्ञातुं सिद्धा भवन्ति ।

ततः प्रतिपाद्यविषयः । प्रतिपादनप्रसङ्गे भाषणकृत् स्वस्य अध्ययनस्य व्याप्तिं प्रकाशयितुं न प्रयतेत । यतः श्रोतारः भाषणश्रवणेन स्वेषां किं प्रयोजनं भवतीति चिन्तयन्ति । भाषणकर्तुः पाण्डित्यप्रकाशनेन तेषां किमपि प्रयोजनं न लभ्यते । तेषां तु विषयज्ञानं मुख्यम् । इदं भाषणकर्ता कदाऽपि न विस्मरेत् ।

भाषणस्य विषये श्रोतृषु कुतूहलं वर्धयितुं विनोदकणिकाः त्रिचतुराः भाषणकृद् वदेत् । किन्तु केवलं विनोदार्थं विनोदकणिका

न प्रयोक्तव्या । भाषणीयवस्तुनः विनोदकणिकायाश्च मध्ये कश्चन सम्बन्धः स्याद् येन भाषणीयं वस्तु श्रोतॄणां हृदये सम्यग् लगति । अपि च तथा प्रयतितव्यं यथा विनोदकणिका भाषणापेक्षया मुख्यतरा न भवेत् । अन्यथा ''कण्ठादपि कण्ठिका एव भारतरा'' इतिवत् विनोदकणिका एव श्रोतॄणां मानसं बलवदाकर्षति, येन प्रतिपाद्यस्य वस्तुनो विषये तेषाम् अवधानं केन्द्रितं न भवति ।

आवश्यकतानुसारं सुभाषितानि, प्रसिद्धा उक्तीः तथा आभाणकांश्च भाषणकृत् वदेत् । किन्तु विनोदकणिकाविचारे यत् कथितं तदत्रापि अन्वेति । अर्थात्, अत्यन्तमधिकप्रमाणेन उद्धृता उक्तयः भाषणस्य स्वारस्यं नाशयन्ति । ''हितं च मितं च'' इत्येवं सूक्तिः कदाऽपि न विस्मरणीया ।

त्रिषु चतुर्षु वा स्तरेषु मुख्य-प्रतिपाद्यवस्तुनः क्रमेण वर्धनं भाषणस्य सुष्ठु स्वरूपं ददाति । एते स्तराः पूर्वपीठिकावसर एव श्रोतृभ्यः विशदीकरणीयाः ।

भाषणस्य विचारे भाषणकरणात् प्राक् पूर्वसिद्धता करणीया । भाषणस्य लेखनं, तस्य च उच्चैः द्वित्रवारं पठनम् इत्यादिकः पूर्वाभ्यासः, अपेक्षितं विचारदार्ढ्यं भाषणकृतः जनयति । केषाञ्चन अ-विस्मरणीयानां मुख्यानां विचाराणां पट्टिकां कृत्वा तस्याः पट्टिकायाः आधारेण विषयमण्डनमपि न दोषाय । विना पूर्वाभ्यासं क्रियमाणानि भाषणानि कदाचिदपेक्षितं प्रभावं श्रोतॄणां हृदये स्रष्टुं न शक्नुवन्ति । अनावश्यकानि दीर्घ-वाक्यानि; वैरस्यापादिकाः पुनरुक्तयः, विचारमण्डने दोषाः, इत्यादयः निषेधात्मका अंशा एव पूर्वाभ्यासाभावस्य फलम् ।

उपसंहारभागे भाषितस्य सर्वस्यापि सिंहावलोकनं विधेयम् । भाषणस्य समाप्तौ प्रसिद्धा काऽपि सूक्तिः उद्धरणीया । अथवा भाषणीयवस्तुना सम्बन्धं कल्पयन्ती काऽपि ह्रस्वा कथा कथनीया। एषा कथा विनोदमयी एव स्यादिति न नियमः । कथायां किञ्चन नीतितत्त्वं स्याद् येन श्रोतारः झटिति भाषणस्य समग्रमपि तात्पर्यं स्वेषां हृदये अङ्कयेयुः । प्रसिद्धानां व्यक्तीनां काऽपि जीवनघटना वाऽपि उदाहरणम् अर्हति ।

भाषणकरणं नाम काचन कला। तस्यां कलायां क्रमेण प्रगतिं योऽपि कोऽपि साधयितुं शक्नोति । यदि सत्यमुच्यते भाषणं विना अस्माकं व्यक्तित्वं जनतामध्ये वर्धयितुम् अन्यःकोऽपि अभ्युपायो नास्ति । तस्माद् यः स्वस्य व्यक्तित्वं जनमध्ये वर्धयितुं काङ्क्षते सः इमां कलां बाढं शिक्षेत ।

४८. नाटकम्

रङ्गे नटैः चलनवलनपूर्वकसंवादद्वारा साहितीकारस्य मनोगतं प्रेक्षकेभ्यः नयत् साहित्यं नाटकम् । केवलं सम्भाषणानां क्रमिकेण लेखनेन नाटकं सृज्यत इति केचित् भ्राम्यन्ति । महाकथायाः (Novel) नाटकस्य च अन्तरङ्ग-बहिरङ्गयोः को विशेष इति ज्ञानाभाव एव तेषां तादृशे भ्रमे कारणम् । अधुना स्तरशः महाकथानाटकयोः भेदान् परामृशामः –

महाकथायां यत्किमपि वस्तु येन केनापि मार्गेण निरूपयितुं शक्यते । पात्राणां भावनाः सम्यक् वर्णयितुमपि तत्र

साहितीकारस्य स्वातन्त्र्यं वर्तते । परन्तु नाटके **सक्रोधं सोल्लासं सोत्प्रासं** (Ironically) **सहर्ष**मित्यादिभिः त्रिचतुरैः शब्दैः पात्रगताः सर्वा अपि भावनाः अभिव्यज्येरन् । महाकथायाम् अतीवदीर्घतमानि सम्भाषणानि लीलया योज्यन्ते । नाटकेषु यथा यथा सम्भाषणानि दीर्घाणि तथा तथा नटानां प्राणसङ्कटं – तैः तेषां कण्ठपाठीकरणीयत्वात् । नाटके केवलं सम्भाषणानि न पर्याप्तानि यतस्तेन प्रेक्षकाणां वैरस्यस्य सम्भवः । रङ्गस्य वामपार्श्व-दक्षिणपार्श्वयोः नटानां चलनस्य विषये किञ्चित् सामञ्जस्यं स्यात् । अर्थात् केवलं वामपार्श्वे नटाः निबिडा न स्युर्नापि दक्षिणपार्श्वे । नाटके कस्यचन सङ्घर्षस्य प्रदर्शनमतित-मामावश्यकम् । सङ्घर्षेण (बहिरङ्गं प्रदर्शयितुं योग्येन) नाटके प्रेक्षकाणाम् आसक्तिर्लग्ना भवति । अनिवार्यरूपेण केचन नाटकीयाः समयाः (Dramatic conventions) प्रयोक्तव्याः यथा- रङ्गे युद्धादिकस्य प्रदर्शनं न करणीयमित्यादि । यदि प्रत्यक्षयुद्धं रङ्गे दृश्यते तदा हिंसायास्तत्र सम्भवोऽस्ति । तादृशे प्रसङ्गे मूकाभिनयः (Miming) आदर्तव्यः ।

बाल्यकालिकीं काञ्चित् घटनां स्मरामि । रामायणीयः लङ्कादहनप्रसङ्गः प्रदर्श्यते स्म रङ्गे । हनुमतो लाङ्गूले प्रत्यक्षाग्निमेव अदीपयन् राक्षसाः । सः अग्निः अतितमां प्रज्वलितः सन् रङ्गस्य वस्त्राणि स्तम्भान् विद्युत्तन्त्रीः इत्यादिकं सर्वमपि भस्मसात् अकरोत् । दैवात् कस्यापि व्रणमरणादिकं न सञ्जातम् । यदि अग्नेः वर्णनं परिणामकारिभिः पद्यैः अकरिष्यत, कियत्यौचिती समभविष्यत्!

अनया दृष्ट्या संस्कृतनाटकेषु सूर्योदय-सूर्यास्तादीनां वर्णनं कियदौचित्यमावहतीति द्रष्टव्यम् । दिनान्तसूचने सूर्यास्तवर्णनं दिनादिसूचने सूर्योदयवर्णनं च प्रायेण नाटकस्य क्रियाः अग्रे सम्यक् चालयतः ।

महाकथायाः साफल्यं वाचकमवलम्बते । लेखको मूलं वाचकः फलं वृक्षस्तु पुस्तकमित्येतावान् महाकथायाः प्रपञ्चः । परन्तु नाटकस्य प्रपञ्चः अत्यन्तमेव भिन्नः । रङ्गः, नटाः, नाटकनिर्देशकः प्रेक्षकः इति चत्वारः स्तम्भाः नाटकसौधस्य चतस्रः आधारशिलाः । एतदेवान्यैः शब्दैर्यदि कथयितुमिष्यते - कथ्यतामेवम् - नाटकप्रदर्शनानि सम्यक् अजानती व्यक्तिरभिनयार्हं प्रशस्तं नाटकं लिखितुं न शक्नोति ।

मम मित्रेण केनचित् विरचितस्य नाटकस्य वस्तु एवं प्रारभते - कश्चन गृहस्थः पथि (गृहस्य पुरस्तात्) यान्तं स्वसखं साग्रहं गृहान्तः प्रवेशयति । पीठे तमुपवेशयति । महानसं गत्वा काफीम् आनयति, तस्मै ददाति च । द्वयोः सम्भाषणम् अनुवर्तते ।

रङ्गमन्दिरे मार्गो यदि प्रदश्यते, गृहाभ्यन्तरं कुत्र कथं प्रदर्शनीयम् ? कथन्तरां गृहाभ्यन्तरे सम्भाषमाणयोः गृहस्थ-तत्सखयोः दर्शनं प्रेक्षकैः करणीयम् ?

वास्तविकस्य प्रपञ्चस्य कलात्मकं पञ्चीकरणं महाकथायां यदि क्रियते लेखकः कृतार्थः । नाटके तु काचन परिमितिरस्ति । तां परिमितिम् अनुल्लङ्घ्य नाटकरचनायां यत्न आस्थेयः । कथादयः

स्वयंपूर्णाः सजीवाः । परन्तु नाटकं निर्जीवं काष्ठसदृशञ्च । रङ्गे प्रयोगेणैव तत् पल्लवति नान्यथा । नाटकग्रन्थः सङ्गीत-गेयकृति-ग्रन्थ इव!

अन्यदिह अवधेयम् । कथानां पाठकाः सुलभाः । किन्तु नाटकवाचका विरलाः । यतो नाटकपठने भावनाबलेन बहवः प्रसङ्गाः स्वयं वाचकैरेव ऊहनीयाः भवन्ति । नाटकपठने तल्लीनतोत्पादनमनेन विघ्नितं भवति । कथापठने तु नैवम् । कथाप्रपञ्चसागरे वाचकः शीघ्रं लीनीभवितुं शक्नोति ।

एतानंशान् अविगणय्य अनेके नाटकरचनां कृतवन्तः । तस्मात् कारणात्तदीयनाटकानां रङ्गे प्रदर्शनमसाध्यं सञ्जातम् । इयं दुरवस्था अनेकेषां संस्कृतनाटकानामपि दृश्यते । भाविनि काले रङ्गे प्रदर्शनयोग्यानि सहस्रशो नाटकानि सृज्यन्ते संस्कृतनाटक-कारैरित्याशास्महे ।

४९. नाटक-निर्देशकः

भारते यदा चलच्चित्राणि नासन् तदा नाटकं, नृत्यं, यक्षगानं, जानपदगीतानि इत्यादीनि मनोरञ्जनसाधनानि बहुविधान्यासन् । चलच्चित्रस्यागमनानन्तरम् अपि नृत्यं सङ्गीतम् इत्यादिकं कथञ्चित् सजीवम् एव । कष्टमनुभूतवती कला तु नाटककला ।

अद्यत्वे नाटकं पश्यतां सङ्ख्या चलच्चित्राणि पश्यतां सङ्ख्यापेक्षया न्यूनतरा । चलच्चित्रेषु जीवनस्य सर्वान् वर्णान्

युद्धमयान् वा शान्तिमयान् वा - यथावद् दर्शयितुं शक्यते । किन्तु नाटकेष्वेतन्न सम्भवम् । चलच्चित्रेषु दर्शयितुं शक्यं वैविध्यं नाटकेषु दर्शयितुं न शक्यते । बहुशः एतस्मात् एव कारणात् अद्यत्वे नाटकस्य जनाकर्षणसामर्थ्यं कृशं सञ्जातम् ।

नाटके कृताभिरुचयः अर्थात् स्वयं नटीभवितुं निश्चयवन्तः जनाः भारते बहवः स्युः । किन्तु नाटकनिर्देशनस्य भारं वोढुं सिद्धाः जनास्तु न्यूनाः । तत्र बहूनि कारणानि सन्ति ।

नाटकं नाम रङ्गे प्रदर्शनयोग्या सम्भाषण-युक्ता हि काचन कला । अस्माकं देशे रङ्गमन्दिराणि विरलानि । प्रथमतस्तावत् कस्मिन् रङ्गमन्दिरे नाटकमभिनेतव्यमिति निर्देशकेन ज्ञातव्यम् । ततः तस्मिन् रङ्गमन्दिरे स्वेन वृतं नाटकं प्रदर्शयितुं शक्यं वेति चिन्तनीयम् । नटाः केचन ''मम एतत् पात्रं माऽस्तु तत् पात्रमस्तु'' इत्यादिरूपेण कलहायन्ते । केनापि कारणेन यः कोऽपि नटः नाटकप्रदर्शनात् पूर्वमेव अभ्यासं कर्तुं वा प्रत्यहमागन्तुं वा यदि न शक्नोति, आगमनं वा स्थगयति, तादृशे पर्याया व्यवस्था निर्देशकेन करणीया । नाटकं सामाजिकवस्तुप्रधानं चेत् निर्देशकस्य न अधिकं कष्टम् । किन्तु तत् पौराणिकवस्तुप्रधानं चेत् मुखवर्णकं, किरीटं, धनुर्बाणादीनि प्राचीनानि आयुधानि इत्यादिकं सर्वं सज्जीकर्तव्यम् ।

अतीवकष्टेन नाटके प्रदर्शितेऽपि, पर्याप्तस्य विद्युत्प्रकाशस्य अभावाद् अन्यस्मात् वा कारणात् नाटकं कदाचित् वैफल्यं अनुभवति । यदि तत् साफल्यं प्राप्नोति, नाटक-निर्देशकस्य हृदये

स्फुरन् आनन्दः नाटकप्रदर्शनं विना कोटिरूप्यकेषु दत्तेष्वपि न जायते । धन्यः नाटकनिर्देशकः, यः बहूनि कष्टानि सोढ्वा जनानाम् उत्कृष्टं मनोरञ्जनं जनयति ।

५०. भगवान् पाणिनिः

'संस्कृतम्' इति शब्दं श्रुत्वा झटिति ''पाणिनिः'' इति शब्दः स्वयं स्फुरति । ''यदि पाणिनिर्नाभविष्यत्, संस्कृतमेव नाभविष्यत्'' इत्यापि केषाञ्चिदभ्यूहः । ''एतावत्पर्यन्तं मानवैः साधितानां सिद्धीनां (achievements) मध्ये महत्तमा सिद्धिर्नाम पाणिनिप्रणीता अष्टाध्यायी'' इत्यपि कश्चिद् विद्वानभिप्रैति ।

एतादृशानल्पप्रशंसापात्रं पाणिनिः कः ? तावत्स्तुतियोग्यं किं कार्यं तेनाचरितम् ? इत्यमुष्मिन् विषये बहवः सज्जनाः यदा कदा कुतूहलं प्रदर्शयन्ति । तेषां कुतूहलशमनाय प्रबन्धेऽस्मिन् यथाशक्ति प्रयत्यते ।

पाणिनेर्जन्मस्थलं 'शलातुर' नामको ग्रामः । पाकिस्तानस्य 'लाहोर्' पुरमेवैष प्राचीनकालिकः 'शलातुर' इति केषाञ्चन विदुषां सम्भावनमस्ति । शलातुरे जातत्वात् ''शालातुरीय'' इति पाणिनेरपरा संज्ञा । आहिकः, पाणिनः (अकारान्तः) शालङ्किः इत्यन्याः अपि तिस्रः संज्ञाः अस्यासन्निति ज्ञायते । अस्य पिता शलङ्कुः, माता च दाक्षी; क्रिस्तोत्पत्तेः प्राक् पञ्चशतसंवत्सरेभ्यः पूर्वं पाणिनिरजीवदिति विचारे नैकेषां विदुषामैकमत्यमस्ति ।

शाकटायन-शाकल्यादि-प्रणीता बह्वो व्याकरणग्रन्थाः पाणिनिकाले लब्धप्रचारा आसन् । तत्र केचिद् व्याकरणग्रन्थाः केवलं ''छन्दो'' (=वेद) व्याकरणपराः । अपरे केवलं ''भाषा'' (=भाषित-भाषा) व्याकरणपराः । पाणिनिः छन्दो-भाषोभय-व्याकरणं स्वस्य ''अष्टाध्याय्यां'' लोकानां पुरस्तादुपास्थापयत् । तस्माद्धेतोः, प्राक्-पाणिनीया व्याकरणग्रन्थाः क्रमेणाध्ययनाध्यापनपरिपाट्याम् अदृश्यतां गताः ।

अष्टाध्यायीति नामैव यथा ज्ञापयति, तथा पाणिनिविरचिते ग्रन्थेऽमुष्मिन् अष्टौ अध्यायाः सन्ति । नवीनव्याकरणग्रन्थेषु दृश्यमानानि ''सन्धिप्रकरणं, समासप्रकरणम्'' इत्यादीनि प्रकरणानि पाणिनिर्विभागशो नारचयत् । तदुपज्ञं विभागः किञ्चिदिव सङ्कीर्णः, उच्चारण-प्रभेदादि-गूढाशयतो जातश्च । अनेन व्याकरणाध्ययनारम्भे छात्राणां क्लेशः अवश्यमुपतिष्ठते । परन्तु, सूत्राणाम् आन्तरालिकस्वरूपपरिज्ञानानन्तरं संस्कृतसौधद्वारस्य कुञ्चिकैव तेषां हस्तगता भविष्यतीत्युक्ते नात्रातिशयोक्तिलेशोऽपि ।

अष्टाध्याय्याम् आहत्य ३९७३ सूत्राणि सन्ति । सूत्रं नाम प्रतिपाद्यस्य वस्तुनः केन्द्रभागस्य यावच्छक्ति न्यूनतमसङ्ख्याकैः वर्णैः सूचनम् । एतत् सूचनं प्रायेण अल्पाकारकं भवति । यथाऽऽहुरभियुक्ताः–

''अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥''

सूत्रेषु अविद्यमानं पदं क्वचिदावश्यकतानुसारेण सूत्रान्तरादनुवर्तनीयं भवति । एतादृशैः कैश्चन उपायैः पाणिनिः केवलम् अनधिकचतुःसहस्रैः सूत्रैः (=clues) संस्कृतस्य स्वरूपं-वैदिक्याः भाषायाः परिचयेण सहैव-आमूलचूलं प्रत्युपस्थापयतीति महदिदमद्भुतम् ।

स्वस्य जीवितकाले भाषा येन रूपेण भाष्यमाणाऽऽसीत्, तस्य विषये गम्भीरं चिन्तनं कृत्वा पाणिनिः स्वकीयां कृतिमरचयत् । यदि आधुनिक्या परिभाषया उच्यते, क्षेत्रकार्यं (field work) सम्यग् विहितमनेन । एतदीयां सूत्रप्रणयनशैलीं शब्दप्रयोगस्य सूक्ष्मविश्लेषणे कुशाग्रीयं च एतस्य बुद्धिवैभवं दृष्ट्वा, विस्मितान्तःकरणा विद्वांसः ''महती सूक्ष्मेक्षिका सूत्रकारस्य'' इत्यद्गारमुदगिरन् ।

भगवच्छब्दनिरुक्तिपरः श्लोकोऽयं प्रथितः –

''उत्पत्तिश्च विनाशश्च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यांश्च स वाच्यो भगवानिति ॥''

यदि श्लोकोऽयं वैयाकरणपरत्वेन परिवर्त्यते–श्लोकपाठ एवं स्यात्–

''निरुक्तिं च प्रयोगं च शब्दानां वाक्यवर्तिनाम् ।
वाक्यक्रमांश्च वेत्तीति भण्यते भगवान् बुधैः ॥''

नूनं वयं धन्या, ये भगवता पाणिनिना निर्मितायां व्याकरणप्रपायाम् अस्माकं विद्यापिपासायाः शमनं कुर्मः ।

जगन्नाथविरचितम्
अभिनवसंस्कृतसाहित्यम्

१.	टुप् कविताः	६-००
२.	ऋजुरोहितम्	८-००
३.	पुण्डरीकः	३०-००

उपरिनिर्दिष्टानि पुस्तकानि भारतीयविद्याभवनात् प्रकाशितानि भवनादेवोपलभ्यन्ते ।

सुरभारतीप्रकाशनस्य अभिनवग्रन्थरत्नानि

१.	संस्कृतगद्यलेखावली	बि.एस्. रामकृष्णराव्	२५-००
२.	पद्यमणिमाला	,,	२०-००
३.	गद्यरत्नमञ्जूषा	,,	३०-००
४.	सुभाषितसमुच्चयः	,,	१५-००
५.	हास्यमधुबिन्दवः	,,	१०-००
६.	पत्रसौधः	एस्. जगन्नाथः	३०-००
७.	प्रबन्धसौधः	,,	३०-००

प्रबन्धसौधः

अस्मिन् ग्रन्थे

- पञ्चाशत् (५०) प्रबन्धाः
- संस्कृतेन प्रबन्धान् लिखितुं ये जनाः इच्छन्ति तेषां सर्वेषां (स्त्रीणां पुरुषाणां च) कृते मार्गदर्शिनः आदर्शप्रबन्धाः
- परिशुद्धा संस्कृतभाषा
- प्रसन्ना शैली

प्रकाशकम्

सुरभारतीप्रकाशनम्

११५/१७, कत्तरिगुप्पे, बनशंकरी तृतीय घट्टः, बेंगलूरु - ५६० ०८५

प्रबन्धसौधः

अस्मिन् ग्रन्थे

- पञ्चाशत् (५०) प्रबन्धाः
- संस्कृतेन प्रबन्धान् लिखितुं ये जनाः इच्छन्ति तेषां सर्वेषां (स्त्रीणां पुरुषाणां च) कृते मार्गदर्शिनः आदर्शप्रबन्धाः
- परिशुद्धा संस्कृतभाषा
- प्रसन्ना शैली

प्रकाशकम्

सुरभारतीप्रकाशनम्

११५/१७, कत्तरिगुप्पे, बनशंकरी तृतीय घट्टः, बेंगलूरु - ५६० ०८५